न्तरे विद्यमानेप्यार्द्रेन्धनप्रभववह्नेरनुत्पाददशायां प्रकृष्टधूमानुत्पादादार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमित्यपि वदन्ति । तदुत्कर्षेति आर्द्रेन्धनप्रभववह्निसामान्यं विना धूमसामान्यस्य प्रकृष्टतादृशवह्निं विना प्रकृष्टधूमस्यानुत्पादनियमादार्द्रेन्धनप्रभववह्नेरेव धूमोपधायकत्वं तथार्द्रेन्धनप्रभववह्नित्वं कारणतावच्छेदकमर्थवशात्सम्पन्नं नान्तरीयकत्वेन वास्तु फलतो न कश्चिद्विशेष इति भावः । अनन्यथेति तादृशान्वयव्यतिरेकाभ्यामुद्भूतरूपस्य तद्वतो द्रव्यस्यैव वा कारणत्वम् उभयथापि व्यापकत्वमुद्भूतरूपत्वेन तत्त्वं पुनरुपवर्णितमेव । घटोत्पन्नेति ध्वंसप्रागभावानधिकरणक्षणस्य प्रतियोग्यधिकरणत्वनियमात् नच प्रागभावस्य ध्वंसप्रतियोगिध्वंस इव तद्ध्वंसोऽपि प्रतियोगिनो ध्वंस इति वाच्यम् अप्रामाणिकध्वंसतत्कारणधाराकल्पनातो ध्वंसानन्तत्वकल्पनाया एवोचितत्वादिति भावः । कार्य्यकारणयोरेव कार्य्यकारणभावग्राहकप्रमाणाङ्गीकृतयोरेव । पक्षेतरस्येत्यादि ननु सन्दिग्धोपाध्यन्तरवत्पक्षेतरोऽपि व्यभिचारशङ्कामादधानः केन वारणीयः स्वव्याघातकत्वञ्च निरस्तमेव अथाच कश्चिदुपाधिर्भविष्यतीति शङ्का शङ्कापिशाचीत्वात् यथा न व्यभिचारशङ्काधायिका तथा पक्षेतरस्योपाधित्वशङ्कापि तदाहितापि व्यभिचारशङ्का पक्षे व्यभिचारशङ्केव न प्रतिबन्धिका अन्यथा निरुपाधिकसहचारभङ्गप्रसङ्गमाच तत्प्रवृत्तानामनुमानानां विलयप्रसङ्गादिति चेन्न सन्दिग्धोपाध्यन्तरसाधारणव्यभिचारशङ्काधानप्रयोजकरूपवता पक्षेतरेण तदाधाने प्रयोजकक्षतेः प्रतिबन्धकत्वासम्भवात् व्यभिचारज्ञानत्वेन च प्रतिबन्धकतायां कारणविशेषजन्यत्वाजन्यत्वादिकं न निविशते गौरवात् मानाभावाच्च कथमन्यथा वरवह्निसंयोगः सर्व्वः संयोगो वा प्रत्यक्षसंयोगधर्म्मातिरिक्तधर्म्मसमवायी समवायित्वादित्यादितो न प्रकृतप्रादिसिद्धिः निरुपाधित्वेऽपि अप्रयोजकत्वादिति चेन्न निरुपाधित्वस्यैव प्रयोजकत्वात् तथात्वेऽपि चाप्रयोजकत्वे निरुपाधित्वाभिमतानामित-

दोषाणामपि तथात्वात् अत्र च कुत्र पक्षातिरिक्ते व्यभिचारशङ्का अस्यार्थं
व्याप्तौ यद्व्याप्तिग्राहकदृढतरप्रमाणविरहिणां निरुपाधित्वमिति
यस्तत्र तत्रान्ततः पक्षसपक्षैकदेशवृत्तिधर्म्मावच्छिन्नसाध्यव्यापकानां
सपक्षैकदेशवृत्तिधर्म्माणामुपाधित्वं सम्भाव्यते इत्याह यथा चाति
प्रसङ्गस्तथा तत्र तत्र वक्ष्याम इति सत्यम् कथकसम्प्रदायानुरोधात्
कथायां सन्दिग्धोपाधित्वेन पक्षेतरो नोद्भाव्य इत्येवम्परो ग्रन्थ इत्याहुः।
सोपाधावेकत्रेत्यादि उपलक्षणमेतत् व्यभिचारित्वमुपाधेरवश्यम्भावमात्रे
तात्पर्य्यम् उपजीव्योपजीवकभावे हि न कार्य्यकारणभावोऽसम्भवात्
व्याप्यव्यापकभावस्तत्किञ्चित्कारत्व विशेषणस्तु ज्ञायमानदूषकतायाम्।
एकमविज्ञायाप्यन्यतरज्ञानाच्च न व्याप्यव्यापकभावः। न चानुकूलतर्क
विरहादेव व्याप्तेरग्रहे तत्समुपाधिज्ञानेन विनाप्यनुकूलतर्कं व्यभि-
चारग्रहे व्याप्तिग्रहसम्भवादिति भावः। यद्वास्येति अत्र पक्ष
इति पूरणात् पक्षनिष्ठसाध्यव्यापकत्वज्ञापकव्यावृत्तिप्रतियोगित्वमर्थः
सत्प्रतिपक्षोन्नायकत्वञ्चात्र दूषकताबीजं तत्र चाप्रयोजकत्वात् साध-
नाव्यापकत्वं नोक्तं साधनस्य सोपाधित्वव्युत्पादनायैव केवलं यस्य
साधनस्येति यद्वा साधनस्येत्यनन्तरमधिकरणइतिपूरणात् साधन
वन्निष्ठसाध्यव्यापकत्वज्ञापकव्यावृत्तिप्रतियोगित्वमर्थः तथा च यद्यभि-
चारित्वेनेत्यादेरपवर्णितार्थनिष्कर्षेऽवायं शुद्धस्य साधनावच्छिन्नस्य च
साध्यस्य व्यापकानामुपाधीनां पक्षे क्वचित् साधनवति वा साध्याभाव
स्यैवानुमानप्रकारत्वाद् सचेत्यादि साधनवत्त्वेन ज्ञायमाने पक्षे साध्य
साधनसम्बन्धाभावः सिध्यन् पक्षधर्म्मतावत्त्वात्साध्याभावमादायैव पर्य्यव
स्यति। ननु शुद्धसाध्याभावोन्नायकस्यार्द्रेन्धनवत्त्वादेः कथं साध्यसा-
धनसम्बन्धाभावोन्नायकत्वमत आह आर्द्रेन्धनेति। अतएवेति साध्या
भावसत्त्वे साध्यसाधनसम्बन्धाभावस्यावश्यकत्वात्तदुन्नायकत्वमक्षत-
मिति भावः। द्रव्यत्वे इति द्रव्यत्वस्य हेतुत्वाभिप्रायेण अयञ्च प्रायशः
सम्भवतीत्यभिप्रेतो वस्तुतः प्रकारभेदेपि न क्षतिः तथाच शुद्धसाध्य

व्यापकोपाधिसत्त्वे शुद्धसाध्याभावः यदवच्छिन्नतद्व्यापकस्तत्त्वे तदवच्छेदकत्वावच्छिन्नसाध्याभावोऽवच्छेदकत्वविशेषितेन चोपाधिविरहेण शुद्धसाध्याभावः साधनीयः अतएव गगनादौ स्पर्शवत्त्वेन प्रमेयत्वेन च प्रत्यक्षत्वे साध्ये वहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकस्योद्भूतरूपस्य तादृशसाध्याभावोन्नयनहेतुत्वमिति । पक्षे यद्रूपाच्या यस्य साधनस्य सत्त्वेपि यत्साधनविशिष्टं साध्यं निवर्तते इत्यर्थस्तु यथाश्रुतस्याप्रसिद्धेः तत्र दूषकताबीजं यदि सत्प्रतिपक्षोन्नायकत्वं तदा साधनानुप्रवेशो व्यर्थः जलं द्रव्यं गन्धवत्त्वादित्यादौ पृथिवीत्वादावतिव्याप्तिश्च अथासिद्ध्युन्नायकत्वं तदा साध्यानुप्रवेशो निरर्थकः जलं गन्धवत् द्रव्यत्वादित्यादौ पृथिवीत्वादावतिप्रसङ्गश्च अथ यथासम्भवमसिद्धेः सत्प्रतिपक्षस्य चोन्नायकत्वं तदा वायुः रूपवान् गन्धवत्त्वादित्यादौ जलत्वपृथिवीत्वादावव्याप्तिः साधनविशिष्टसाध्याप्रसिद्धेः साध्यसाधनवत्त्वप्रकारकबोधविरोधिबुद्धिकाभावोन्नायकत्वमर्थः विरुद्धादौ चैकैकाभावबुद्धिरुभयवत्ताबोधम् विरुद्धस्थले तु क्रमादिरूपतथाविधबोधप्रतिबन्धा समन्वय इत्यपि वदन्ति यत्तु साध्यावृत्तित्वे सति साधनावृत्तित्वे यच्छून्यत्वेन साध्यसाधनेऽनुगमय्य तदभावोन्नायकत्वं वाच्यमिति तन्न यत्र भिन्नभिन्नसम्बन्धेन साध्यसाधनभावस्तत्र सद्धेतुके हेतुतासम्पादकेन सम्बन्धेन साध्यस्य साध्यतासम्पादकेन च हेतोरन्यत्रापि च यथाकथञ्चित्सम्बन्धेनोभयस्याभावेनोन्नायकेऽतिव्याप्तेः किञ्च तादृशधर्मशून्यत्वेन रूपान्तरेण वा तदभावस्योन्नायकत्वमभिमतम् नाद्यः साध्यसाधनान्यतरवति तदसम्भवात् नान्त्यः धूमेन पर्वते वह्नौ साध्ये महानसीयवह्नित्वाद्यवच्छिन्नाभावोन्नायकमहानसत्वादावतिव्याप्तेः । यच्च पक्षावृत्तित्वे सति ये साधनवदवृत्तयस्तच्छून्यत्वेन पक्षसाधनवत्ताविशिष्टप्रमाविशेष्यत्वेन वा तदनुगतीकृत्य तत्र साध्यव्यापकत्वमर्थमाहुः तत्र यदि सत्प्रतिपक्षव्यभिचारयोरन्यतरमात्रोन्नायकत्वं दूष-

भवतीत्थं तदा द्वयोरनुगमकमफलम् । अथ यथासम्भवमुभयोर्ज्ञापक-
त्वं तदा अवच्छिन्नहेतुके सत्प्रतिपक्षोन्नायकेऽव्याप्तिः यदपि च पक्षताव-
च्छेदके साधने च न वर्त्तते यत्सम्बन्धस्य पक्षतावच्छेदकसाधने इति
प्रतीतिविरोधस्य वाऽर्थे साध्यव्यापकसम्बन्धसाङ्गः तत्रापि किं येन
सम्बन्धेन हेतुता तेन अथ येन पक्षतावच्छेदकं पक्षे वर्त्तते तेन उत
येन केनचित्सम्बन्धेन धर्म्माश्रये साध्यव्यावर्त्तकत्वमभिमतं नाद्यः अयं
वह्निमद्धूमादित्यादौ जलमत्त्वकवह्निसाध्यके संयोगसम्बन्धेन साधने
धूमादौ वह्निसामग्र्यादावव्याप्तेः पक्षतावच्छेदकस्य संयोगेनावृत्तेः
संयोगेन धूमवतस्तु वह्निमत्त्वनियमात् न द्वितीयः घटो जातिमान्
मेयत्वादित्यादौ समवायित्वादावव्याप्तेः वह्निमत्पर्व्वतपक्षके पर्व्वतो वह्नि-
मान् धूमादित्यत्र धूमावयवे वह्निव्यावर्त्तके वह्निसामग्र्यादावतिव्या-
प्तेश्च अतएव नेतरोऽपीत्यादि स्वयमूहनीयमिति कृतं पल्लवितेन ।
व्याप्याव्याप्रसिद्धेः व्याप्यत्वस्य वह्निव्यापकत्वे सति धूमाव्यापकत्वस्या
प्रसिद्धेः । अनुमितीति यदुक्तं व्यभिचारोन्नायकत्वं तदुन्नयनस्वरूप
योग्यत्वं तद्व्याप्तिपक्षधर्म्मताद्वयं पर्य्यवसितसाध्यव्यापकत्वादिकज्ञानानु-
मितिप्रतिबन्धकज्ञानविषयतावच्छेदकमेवेति भावः । ननु सामान्यलक्ष-
णमितरव्यावर्त्तकोपाधिकं विशेषलक्षणन्तु दूषकतायामुपयुज्यत इत्यत
आह विशेषेति यथाश्रुतेऽवच्छिन्नसाध्यव्यापकोपाध्यव्याप्त्या यत्किञ्चि-
द्धर्म्मावच्छिन्नसाध्यव्यापकत्वमेव वक्तव्यं तथा च वह्निना धूमस्य धूमेन
वह्नेर्वा साधने पक्षेतरस्य सम्यग्ज्ञानादनुमितिप्रतिबन्धापत्तिरित्यर्थः
अवैधारोपयितृत्वे च सर्वोपाधिव्यवहारापत्तिः पर्य्यवसितत्वाद्यभिधाने
चाव्ययप्रवेश इतिभावः । व्यवहारौपयिकं स्वव्यभिचारेण साध्यव्यभि-
चारोन्नायकत्वं व्यापकन्तु तत्साध्यसमानाधिकरणत्वे सति तत्सा-
धनाव्यापकत्वं साध्यसाधनभेदाद्भिन्नमेव वस्तुतो व्यभिचारिणः साधन
स्यैवानुप्रवेशाच्च नातिप्रसङ्गः नच रूपेण गुरुत्वे साध्ये पृथिवीत्वा
भावादेरुपाधितापत्तिः गुरुत्वव्यभिचारि रूपस्य तेनाव्याप्यत्वात् तद-

व्याप्यत्वपक्षेऽपि गुणत्वाव्यभिचारादिति दूषणत्रैविकल्प्यन्तु. यथाश्रु-
श्रवणमनुगतमेवेति मतमिदं परे परिष्कुर्व्वन्ति तन्न साधीयः तथा
हि साध्यसाधनव्यक्तिस्वरूपगर्भं सोपाधित्वमपि तु साध्यतावच्छेदक
साधनतावच्छेदकधर्म्मगर्भं तथाच द्रव्यत्वेन सकलगुणव्यक्तिषु सोपाधेरपि
द्रव्यत्वस्य गुणत्वेन सकलगुणेष्वेव निरुपाधित्वात् गुणत्वेन गुणे साध्ये
सत्तात्वेन रूपेण सोपाधेरपि सत्तायाः गुणकर्म्मान्यत्वविशिष्टसत्तात्वेन
निरुपाधित्वात् तथाच तद्रूपावच्छिन्ने साध्ये तद्रूपावच्छिन्ने साधने च
क उपाधिरित्यत्र तद्रूपावच्छिन्नसाध्यसमानाधिकरणत्वे सति तद्रूपाव
च्छिन्नसाधनाव्यापकत्वमनुगतं लक्षणं वाच्यं ननु तद्रूपावच्छिन्नतत्त-
त्साधनव्यक्त्यव्यापकत्वमननुगमात् तथाच गुणत्वत्वावच्छिन्नसमानाधि
करणस्य रूपत्वावच्छिन्नाव्यापकस्य पृथिवीत्वाभावादेरुपाधित्वं दुर्व्वारं
व्यभिचारित्वेन साधनविशेषणमनुपदर्शितमेवेति संक्षेपः । उपाधिल-
क्षणे साधनाव्यापकत्वं न विशेषणं दूषकतायामनुपयोगात् व्यभि-
चारत्वाच्चेति । सत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकतावादिनामभिप्रायं
प्रकाशयति केचित्त्विति साध्यतावच्छेदकावच्छिन्नं साध्यञ्च नोपाधिः
परं प्रत्युन्नाय्यः साध्याविशिष्टत्वात् पक्षे साधनस्य निश्चयेऽनुमानस्य
वैयर्थ्यात् अनिश्चये च तस्यायोगात् । सन्दिग्धोपाधित्वेनापि न
तदुन्नायकत्वाच्च अनुमितीति हेतौ साध्यव्यभिचारः सन्दिग्धश्चेत्
कृतं सन्दिग्धोपाधिना असन्दिग्धश्चेत्कथं तस्य सन्दिग्धोपाधित्वमिति
तु तत्त्वम् । हेतुव्यभिचारेति व्याप्यसंशयस्य व्यापकसंशयहेतुत्वा-
दितिभावः नच तत्र मानाभावः कोटिस्मरणादितएव तदुपपत्तेः क्वचि
त्तदनुमितिज्ञानस्यापि व्याप्यतदभावयोर्व्यापकतदभावसाहचर्य्यस्य गृही
तत्वेन तत्स्मरणयोरप्रक्षीणत्वात् तदभावे तु तत्संशयाद्व्यापकसंशय
स्याप्यभावादिति वाच्यं मध्याह्ने कृतापनो न जलह्रदे इति स्मरतां
पर्व्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां कृतापनसंशय
भावाभावदर्शनात्तस्यापि तद्धेतुत्वात् अतएवोत्कटकोटिकाव्याप्यस्य

संशयाधायकस्याप्युत्कटकोटिकः संशयः कारणोत्कर्षेणैव कार्योत्कर्षात् समानेत्यादि सूत्रमुपलक्षणपरं तथाचकारो वा अनुक्तसमुच्चयार्थ इति वदन्ति । कोटिद्वयसहचरितधर्म्मवत्तया धर्म्मिज्ञानं हेतुः धर्म्मस्य वैषम्यं ज्ञानस्य च निश्चयत्वं नोपयुज्यते गौरवात् अवगाह्यते च लिङ्गसन्देहो लैङ्गिकतदभावसहचरितौ लिङ्गतदभावौ धर्म्मिणि तथा च साधारणधर्म्मस्यैव तत्रान्तर्भाव इति तु नव्याः । लिङ्गतदभावयोः प्रत्येकमेकैककोटिसाधारण्येऽपि मिलितयोरसाधारणत्वं सत्प्रतिपक्षस्थले विरुद्धयोरिव हेत्वोरिति तु टीकाकारानुयायिनः । इत्थञ्च साधनाव्यापकत्वसन्देहे साध्यव्यापकव्यभिचारसन्देहात् साध्यव्यभिचारसन्देहो हेतौ स्फुटएव साध्यव्यापकत्वसन्देहे तु साधनाव्यापकव्याप्यत्वसन्देहात्साध्ये साधनाव्यापकत्वसन्देहो बोध्यः । उपाधेः साध्यव्यापकत्वसन्देहेऽनाहितात्साधने साध्यव्यापकव्यभिचारसन्देहात्साध्यव्यभिचारसन्देहः इत्थमेव च दशाद्वये संशयस्थले व्यभिचारसंशयस्योक्तिसम्भव इत्यपि वदन्ति । उभयेति पक्षांशेऽपरस्य पक्षविशिष्टापरसाध्यतायान्तु पक्षैकस्योपाधित्वमिति तु तत्त्वम् । ईश्वरेति वस्तुतः सद्धेतावपि वस्त्वायहद्रायामुपाधिसन्देहेन व्यभिचारसन्देह इति भावः । सन्दिग्धेति न चानैकान्तिकत्वसन्देहः प्रतिबन्धको न तु तज्ज्ञानमिति तदर्थं तदुद्भावनमफलमिति वाच्यम् अनैकान्तिकत्वसंशयात् मम व्याप्तिग्रहो मा भूदित्यभिप्रायेण प्राचां हेतुदोषत्वेनासाधकतासाधकतया जिज्ञासादिद्वारा परम्परया सन्देहोपयोगित्वेन च तदुद्भावनस्य साम्प्रदायिकत्वात् ।

उपाधित्वस्य संशये निश्चये च जायमाने यज्ज्ञानमनुमितिं विरुणद्धि तदेवास्य दूषकताबीजमित्यभिप्रायेणाह सन्दिग्धेति तद्व्यतिरेकस्य क्वचिद्व्याप्यत्वेन क्वचिच्च पक्षधर्म्मत्वेन सन्दिग्धत्वात् बाधोन्नीतेति ननु बाधेऽव्यतीर्णे ततएव हेतोरसाधकत्वात् अतमुपाधिना न वासाधारण्यं पक्षस्यैव सपक्षत्वात् अवतीर्णे तु नोपाधित्वं

पक्षेतरान्तरवत् साध्यव्यापकताया एवाग्रहात् अनुकूलतर्कादिना कथञ्चित्तद्ग्रहे च नासाधारण्यं व्यतिरेकित्वस्यान्वयव्याप्त्यग्रहस्य सत्प्रतिपक्षरूपतया च सत्प्रतिपक्षान्तरस्याकिञ्चित्करत्वादित्यरुचेराह पक्षवृत्तित्वेति पक्षे तद्ग्रहदशायां तदभावग्रहासम्भवादिति भावः। व्याप्तिविरहरूपतां निरस्य व्याप्तिज्ञानाभावद्वारकतां निरस्यति नापीति। अनौपाधिकत्वज्ञानस्य सोपाधिकत्वज्ञानाभावस्य कारणविघटकतया कारणाभावरूपतद्ग्रहज्ञानविषयतया अनौपाधिकत्वज्ञानस्य कारणत्वं नान्वयव्यतिरेकसिद्धम् परन्तु सोपाधित्वज्ञानस्य प्रतिबन्धकताया विना कारणीभूतज्ञानविघटनमसम्भवितेन कल्पनीयं सैव त्वसिद्धेति दूषणतात्पर्य्याद्यथाश्रुतमेव साधीयइत्यपि वदन्ति। व्याप्यत्वासिद्धेर्व्याप्यत्वाज्ञानेऽन्तर्भावस्तद्द्वारा दूषकत्वं भिन्नधर्म्मिकत्वं परिहरन्नाह नचेति। नहीति विरोधिविषयकत्वाभावेन साक्षात्प्रतिबन्धकत्वासम्भवादिति भावः। साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमित्युभयत्रैव बहुव्रीहिः स्वस्मादित्यादेरदूषणं वेति शेषः दूषकताबीजभिन्नमिति निश्चयदशामधिकृत्य यन्निश्चयद्वारोपाधित्वनिश्चयस्य दूषकत्वं तत्संशयद्वारा तत्संशयस्यापि तथात्वमिति भावः। व्यभिचारज्ञानद्वारेति मानसे व्यभिचारनिश्चये उपाधिज्ञानं विशेषदर्शनरूपत्वेनोपयुज्यते व्यभिचारानुमानं पुनरग्रे वक्ष्यति। व्याप्तीति साध्यसम्बन्धितावच्छेदकरूपविरहः साधनतावच्छेदके साध्यसम्बन्धितानवच्छेदकरूपत्वपर्य्यवसन्नः साध्यवदन्यावृत्तित्वविशिष्टसाध्यवद्वृत्तित्वविरहो वोन्नेयः ननु स्वसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यकत्वं स्वत्वस्याननुगतस्याभावेन तत्तत्साधनत्वपर्य्यवसाने साध्यप्रसिद्धिमात्रेणैव कृतार्थत्वात् साध्यव्यापकोपाधिव्यभिचारित्वेन हेतौ साध्यव्यभिचारित्वे साधनाव्यापकोपाधिव्याप्यत्वेन तदंशे साधनाव्यापकत्वमनुमेयमिति तु नव्याः। व्यतिरेकिणि साधने व्याप्तिविरहस्य व्यभिचारस्य चोन्नयने उपाधिः साधनाभाववद्वृत्तित्वं व्यभिचारास्फुटत्वादन्यथायामुपा-

अनुसरणाद्यत्राधिकरणे हेतोः साध्यव्यभिचारित्वं तदीयधर्म्मो नास्य
साध्याव्यापकत्वग्रहः। उपाधिमात्रेति तेनापि व्यभिचारानुमाने
तत्रापि तथाविधोपाधिसम्भवादिति भावः वस्तुतस्तु व्यापकव्यभिचारि-
णो व्याप्यव्यभिचारित्वे व्याप्यव्यापकभावव्याघातापत्त्या हेतोः साध्य
व्याप्यत्वेन साधनाभाववद्वृत्तित्वस्य साध्याव्यापकत्वान्नोपाधित्वमिति
तत्त्वम्। अस्तीति व्याप्यत्वाभावसाधनाभिप्रायेण साधनाव्याप्यत्व-
स्योपाधित्वे च नैष दोषः। साधनेति यथाश्रुताभिप्रायेण प्रतियोगि
व्यधिकरणसाधनाभाववद्वृत्तित्वस्य साधनवदन्यवृत्तित्वस्य चोक्तौ तथा
त्वासम्भवात् एवञ्च सत्प्रतिपक्षे निश्चितोपाधिवत्सन्दिग्धोपाधिरप्याश्रयः।
नच तत्सत्त्वस्य व्यभिचारसन्देहस्य प्रतिहेतुसमाजादेव सिद्धेः किं
तेनेति वाच्यं परस्परप्रतिबन्धेनैवानुमित्यनुत्पादे तत्र व्यभिचार
सन्देहस्यावश्यकत्वे मानाभावात् उपाधिसन्देहाधिगम्ये तत्र व्यभि
चारसन्देहेन तुल्यबलत्वाभावात् न चातुल्यबलेन सत्प्रतिपक्षो व्यभि
चारादिशङ्काधानं वा स्वरसतः सन्दिग्धव्यभिचारादिनापि तथात्व
प्रसङ्गादिति। अत्र च क्वचिदुपाधेस्तुल्यबलत्वे सत्प्रतिपक्षोन्नायकता
तथा तर्कादिसाचिव्यादधिकबलत्वेन बाधोन्नायकतयापि दूषकत्वं
व्याप्त्यादिप्रतिसन्धाने तदुन्नयनस्य ततोऽनुमितिप्रतिरोधस्य च दुर्व्वा
रत्वात् परन्तु सार्व्वत्रिकत्वं न तस्येति ध्येयम्। असाधारणविप-
र्य्ययइति इदं सत्प्रतिपक्षोन्नायकत्वमभिप्रेत्य। यद्यपि व्यतिरेकिणा
सत्प्रतिपक्षत्वे सत्प्रतिपक्षे सत्प्रतिपक्षान्तरस्यादोषत्वान्नासाधारण्यं
दोषाय तथापि सत्प्रतिपक्षोत्थितैरुपाधिभिः साध्याव्यापकत्वग्राहकप्रमाणा
भावे तात्पर्य्यम्। तदयं निष्कर्षः यत्र यद्दोषोन्नायकतया दूषकत्व
मुपाधेः तत्र तदुन्नयनोपाधिकत्वमेव तस्याभासत्वे प्रयोजकम् एवञ्च
यत्र व्यापकतायां पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धि-
रुद्देश्या तत्र पक्षाव्यापकविपर्य्ययस्याभासत्वं तद्विरहेण पक्षैकदेशे
सत्प्रतिपक्षेऽप्येकदेशान्तरे साध्यसिद्धेरप्रत्यूहत्वात् यत्र तु पक्षताव-

पक्षैकदेशावच्छेदेन तथा तत्र तादृशस्योपाधित्वमेव एकदेशे प्रतिपक्ष-
स्यापि तादृशसिद्धिविरोधित्वात् साध्यविपर्य्ययस्यासन्दिग्धमनुपाधित्वे
प्रयोजकं न तदज्ञानमज्ञातस्यापि तस्य व्यापकव्यतिरेकेण सिद्धिसम्भ-
वात्। अथ सिद्धसाध्यविपर्य्ययत्वेन आभासत्वं व्यभिचारोन्नायकतया
दूषकत्वपक्षे विनापि साध्यप्रसिद्धिं प्रत्येकपदार्थप्रसिद्ध्यैव घटे। नाभि
धेयइत्यादि प्रतिज्ञायन्ते व्युत्पादयिष्यते च तत्र प्रतिज्ञाविरहः व्याप-
काभावेनाप्रसिद्ध्यैव व्याप्याभावस्य सिद्ध्यभ्युपगमात् पूर्व्वसाधनव्यति
रेकत्वन्तु नोपाधित्वेन नाप्यनुपाधित्वेन नियतं वह्निना धूमस्य स्थाप-
नायां प्रतिहेतावार्द्रेन्धनाभावे वह्न्यभावस्योपाधितया धूमाभावस्य
चार्द्रेन्धनाभावेन स्थापनायां प्रतिहेतौ वह्नावार्द्रेन्धनस्यानुपाधिता-
याश्च प्रसङ्गात् परन्तु पूर्व्वसाधनव्यतिरेकस्य प्रतिहेतावुपाधित्वेनो-
द्भावने सत्प्रतिपक्षमात्रमुच्छिद्येत सर्व्वत्रैव तत्सम्भवात् आभासत्वेऽपि
स्थापनाया विशेषाग्रहदशायामेव सत्प्रतिपक्षोपन्यासात् वस्तुतः साध्य
व्यापकस्यापि पूर्व्वसाधनव्यतिरेकस्य तदानीं तत्त्वेनाग्रहादुपन्यास-
सम्भवात् अतो बलवत्तरानुकूलतर्कं विना पूर्व्वसाधनव्यतिरेको
नोपाधित्वेनोद्भाव्य इति कथकसमयवशादेवासावुपाधित्वेन नोपन्यस्यत
इति। यथाकर्त्तृत्वेति कादाचित्कत्वेन सकर्त्तृकत्वस्थापनायामजन्यत्वे
प्रतिहेतावित्यर्थः।

अनुमितिलक्षणैककार्य्यानुकूलतासङ्गत्या पक्षधर्म्मतां निरूपयि-
तुमाह व्याप्तीति। सन्दिग्धेति। यत्र साध्यस्य यादृशसम्बन्धावगाहि
निर्णयनिवर्त्त्यो यः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितेः पक्ष-
तेत्यर्थः तेन न पक्षसाध्यविशेष्यकसंशयानुगमो न वा सम्बन्धान्तरेण
सन्देहेऽपि निर्णीतसम्बन्धेन पक्षत्वम् न वा तमःप्रभृतिषु समवाये-
नाकाशादिसाधने तद्वैकल्यम्। संशययोग्यतां निरस्यति नापीति
साधकबाधकमाने सिद्धिबाधौ केवलान्वयिनि च पक्षनिष्ठाभावप्रति
योगित्वधीरेव सुलभोबाधः। ननु तथापि पुनरनुमित्सा ततः पक्षा-

मर्शानन्तरं स्मरणात्मकाद्वा परामर्शादनुमितीच्छासाधनताविषयका-
दनुमित्या सतोऽनुमितिरिति प्राचां मतेनाख्यानीयमित्यत आह सिषा-
धयिषेति न चानुमितिजनिकेच्छैव पक्षता सा च क्वचित्त्वनिष्ठेन सर्व-
श्वरनिष्ठैव सुलभेति वाच्यं तस्या नित्यत्वेन सिद्धौ सत्यामपि पक्षता
प्रसङ्गात् न च सत्त्वात्तदानीं न तज्जनकत्वं यद्धि न तद्योग्यता अनुमा-
यात् न च तदुपधानम् अनुमितेः पूर्वं तदभावात् न च तत्सामग्रीसमव
धानं कारणमात्रञ्च पक्षतादिनिक्षेपप्रसङ्गाच्च वैयर्थ्यात् तदानीं
सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणत्व वक्तव्यत्वाया-
ताच्च। सिषाधयिषेति यत्रानुमित्यानन्तरं साध्यव्याप्यवत्त्वविशिष्ट
पक्षस्मरणम् अनुमितीच्छासाधनताविषयकतादृशस्मरणाद्वा अनुमित्या
अनुमित्यापूर्वकालोत्पन्नविशेषणस्मरणाद्वा अनुमित्याकालोत्पन्नेन्द्रिय
सन्निकर्षसहितात्साध्यव्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरञ्चानुमिति
स्तत्र पक्षतासम्पत्तये सत्यन्तं साध्यमानविशेषणं। सिषाधयिषा
च तत्साध्यविशिष्टतत्पक्षविषयत्वप्रकारिका अनुमितिविषयिणीच्छा
यत्किञ्चिद्वेत्वरं ज्ञानं जायतामितीच्छायामपि सिद्धिसत्त्वेऽनुमित्यनु-
त्पादात् अनुमितित्वाप्रकारिकायामपि प्रत्यक्षाद्यतिरिक्तं पर्वते वह्नि
ज्ञानं जायतामितीच्छायां प्रत्यक्षाद्यनन्तरमनुमित्युत्पादाच्च यादृश
यादृशेच्छासत्त्वे सिद्धौ सत्यामनुमितिः तत्तदिच्छाभावसमुदायस्य
विशेषणत्वादिच्छाया अननुगमेऽपि न क्षतिः धूमेनानुमिनुयामिती-
च्छायामालोकपरामर्शाद्वह्न्यामपि सिद्धौ॰ यदि नानुमितिस्तदान्य
मात्रलिङ्गकानुमितीच्छा धार्मिणीजिज्ञासादिवत् पृथक् प्रतिबन्धिका
यदि च तत्रानुमितिः तदा सिद्धिसत्त्वे तत्रानुमितेर्वारणाय तल्लि-
ङ्गकानुमितीच्छा तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छा
वा वाच्या लिङ्गविशेषेणापि च नियन्त्रितं पक्षत्वं तल्लिङ्गकानुमितौ
सिद्धिकालीन तल्लिङ्गकानुमितीच्छा विरहविशिष्टान्यलिङ्गकानु-
मितीच्छैव वा प्रतिबन्धिका साधनमात्रं साध्यवत्त्वनिश्चयः भावश्च

मयत्वादिना पर्व्वते तेजस्त्वादिना च वह्नेः सिद्धावपि पर्व्वतत्वेन तत्त्व वह्नित्वेन च तस्यानुमितेर्द्धर्म्मित्वसाध्यत्वयोरवच्छेदकावनुप्रवेशनीयौ। यदि च पर्व्वतत्वसामानाधिकरण्येनैव साध्यसिद्धावपि विनानुमित्सामन्यत्र तादृशानुमितिरनुभविकी तदा धर्म्मिविशेषेऽपि निवेश्यो नान्यथा पक्षतावच्छेदकस्य सामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति तदवच्छेदेन सिद्धेः तत्सामानाधिकरण्यमात्रेणानुमितिं प्रति तु सिद्धिमात्रस्य विरोधित्वम् इत्यपि लिङ्गभेदन्यायोऽनुसरणीयः साध्यविशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वे तां प्रति पक्षविशेष्यिकैव सिद्धि र्विरोधिनी एवञ्च पक्षविशेष्यकसिद्ध्यनन्तरमपि साध्यविशेष्यकानुमितिर्जायते तुल्यन्यायात् समानाकारायाः सिद्धेः प्रतिबन्धकत्वे पर्य्यवसानात् तादृशानुमितिं प्रति सिद्धिमात्रं विरोधि साध्यप्रसिद्धिरेव वा अतएव प्रसिद्धसाध्यकस्थले पक्षविशेष्यिकैवानुमितिरनुभूयत इति अथ व्याप्तिस्मरणादिना पूर्व्वानुमित्सानाशे परामर्शकाले च सिद्धिसत्त्वेऽनुमित्सान्तरोत्पत्त्यैवानुमिति स्तथैव कारणीभूतस्य विशिष्टाभावस्य सम्पत्तिरित्युपाध्यायाः। अन्ये तु द्वित्रिक्षणान्तरितायामप्यनुमित्सायामनुमितिदर्शनात् अनुमित्सायोग्यता वाच्या सा च न स्वोत्पत्त्यनन्तरं स्वविषयसिद्ध्यनुत्पादः अनुमित्सानन्तरमन्तरानुमित्यनुत्पादे दिवसादिविलम्बेनेन्द्रियादिना निर्वृत्तेऽपि साध्ये लिङ्गपरामर्शादनुमितिप्रसङ्गात् किन्त्वनुमित्सानन्तरं लिङ्गदर्शनादिक्रमेण यावता कालेनोत्सर्गतः परामर्शो जायते तावानेव कालः स्वरूपयोग्यत्वेन तथा कल्पनात् अथवानुमित्सोत्पत्त्यनन्तरमनुमित्सानाशेऽपि सिद्धौ सत्यां यावत्कालमध्येऽनुमितिर्जायते तावानेव कालोऽनुमित्सायोपलक्षितः यदि च सिद्ध्यनन्तरं तन्नाशेऽपि द्वित्रिक्षणमध्ये विनानुमित्सामनुमित्यनुत्पादोऽनुभवसिद्धस्तदा सिद्धावपि तावानेव समय

उपनायकीयः विशिष्य ज्ञाननियमस्त्ववच्छित्तेः करणीय इति वदन्ति ।
अत्र च यत्र साध्यनिर्णयेच्छानन्तरं पूर्व्वोक्तन्यायेन साध्यतद्व्याप्य-
विशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा यत्र वा साध्यतद्व्याप्यधर्म्मतादृश
व्याप्यधर्म्मान्तरविशिष्टपक्षस्य तत्पक्षकसाध्यतद्व्याप्यवत्त्वानुमित्योरिष्ट
साधनतायाश्चैकं स्मरणं तत्र तयोरनुमित्या ततः साध्यतद्व्याप्यवत्त्वानु
मिति तत्र तदनन्तरमनुमितिप्रसङ्गः योग्यताविवक्षणे तु सुतरामे-
वेति तदिच्छाविषयसिद्ध्यनुपस्थितत्वं तद्विशेषणं पक्षसाध्यभेदेन च
पक्षताया भेदात् पृथक् पृथगेव कार्य्यकारणभावः तथाच यत्र सिद्ध्य
नन्तरं कदाप्यनुमिति र्न जाता तत्र सिद्ध्यभावमात्रं कारणं न तु
तत्रेच्छानिवेशोऽपि गौरवात् प्रयोजनाभावाच्च तेन यत्पक्षकयत्साध्य-
कानुमितौ कस्यापीच्छा न जाता तत्रोक्तिसाधारण्यमात्रसम्पादनाये-
श्वरेच्छानिवेशनाशङ्को नोपादेयः । यत्तु सिषाधयिषाविरहविशिष्ट
स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्ना या सिद्धिः सिषा-
धयिषाविरहविशिष्टाया तस्या अभावः पक्षता अथ तृतीयक्षणाव्यव-
धायकद्वितीयक्षणएवाव्यवहितत्वपर्य्यवसानात्पाविरलक्रमेण सिद्धि
सिषाधयिषानुमितय स्तत्र द्वितीयक्षणे पक्षतासम्पत्तये द्वितीयः
सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः प्राथमिकस्तु स्वक्षणस्य कि-
मर्थमिति चेत् यत्र क्रमेण सिषाधयिषाप्रात्यक्षिकसिद्धिपरामर्शानु-
मितयस्तत्र तृतीयक्षणे पक्षतासम्पत्त्यर्थमिति तन्न यत्रानुमित्सानाश-
काले प्रात्यक्षिकी सिद्धिरथ च परामर्शानुमिती तत्र पक्षताविरह
प्रसङ्गात् अथ प्रथमक्षणमपेक्ष्य द्वितीयस्यैव द्वितीयमपेक्ष्य तृतीय
स्याव्यवहितोत्तरत्वं स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति
स्वाधिकरणक्षणध्वंसाधिकरणत्वं वा तादृशाव्यवहितोत्तरत्वं वाच्यं
तथाच यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र प्रथमक्षणे पक्षता
वारणाय उत्तरक्षणस्य विशेषणं प्रथमं विशिष्टान्तं द्वितीयन्तु सिद्धे
स्तत्रैव द्वितीयक्षणे पक्षतासम्पत्तये यदि पुनरिच्छाजनिका सामग्री

प्रतिबध्नात्यनुमितिं तदानुमित्यव्यवहितपूर्व्ववर्त्तिसिद्धिभिन्नसिद्ध्यभाव मात्रं पक्षतेति चेत्तादृशसिद्धीनां तत्तद्व्यक्तित्वेनाभावः कारणं नियत रूपविशिष्टत्वेन वा नाद्यः अनन्तकार्य्यकारणभावप्रसङ्गात् तादृश सकलसिद्धेरनुमित्याविरहविशेषणदानस्य वैयर्थ्यात् तत्तत्क्षण सम्बन्धक्षणानां तत्तत्समयावच्छिन्नतत्तन्मनोयोगादीनां वा प्रतिबन्धकत्व प्रसङ्गाच्च नान्त्यः सत्यपि परामर्शादौ कस्याश्चित्सिद्धेरनन्तरमनु- मितिः कस्याश्चिन्नेत्यत्र नियामकाभावात् न वा कारणतावच्छेदकाव- च्छिन्नसमाजाधीनकार्य्योत्पादादिकं कारणतावच्छेदककोटौ निविशते तथा सति उत्पत्तिकालावच्छिन्नत्वविशेषितेन स्वक्षणाव्यवहितोत्तर क्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकत्वविषयत्वेन स्वसमानाधि- करणानुमित्यव्यवहितपूर्व्वक्षणोत्पन्नत्वविषयत्वेन स्वक्षणाव्यवहितोत्तर क्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नत्वविषयत्वेन वा किं वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्व्वक्षणवृत्तित्वविशिष्टज्ञानत्वा- दिना कारणत्वं स्यात् अव्यवहितोत्तरत्व द्वितीयक्षण एवेति नाति प्रसङ्गः न चाद्विमेषु परामर्शस्थितिक्षणे यत्र विरोधिसिद्ध्यादिविनाश स्तदुत्तरक्षणेऽनुमितिर्न स्यात् परामर्शस्यातथात्वादिति वाच्यम् अनुमितिसामग्र्या विरोधिन्या विरहेण तदानीमुत्पन्नादनुव्यवसायादे- रन्ततः संस्कारादेर्वा तत्सम्भवात् संस्कारजन्यत्वेन स्मृतित्वस्य प्रागेव निरासात् स्यादा स्वसमानाधिकरणानुमित्यव्यवहितपूर्व्वक्षणवृत्ति- भिन्नत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्व्वत्वानधिकरणक्षणवृ- त्तित्वविशिष्टत्वेन वा स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणसमया व्यवहितपूर्व्वक्षणवृत्तित्वविशिष्टत्वेन वा प्रतिबन्धकत्वं तदव्यवहित पूर्व्वत्वञ्च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम् । नचात्र प्रथमे यत्र सिद्धात्मकपरामर्शानन्तरं सिषाधयिषाया उत्पत्तिकाले तत्पुरुषी यस्य कस्यापि धर्म्मस्य न विनाशोऽनन्तरं पुनरनुमितिः तत्र तदुत्पत्ति समयेऽपि सा स्यात् तत्पूर्व्वकालीनानां सर्व्वेषां तादृशपूर्व्ववर्त्तित्वेन।

विरोधित्वादिति वाच्यम् अनवरतपरिस्पन्दमानापरिमितपवनादिपर
माणुचेतनसंयोगसन्तानान्तःपातित्वशीनामविरतमेवोपरमात् फला-
नुत्पादकत्वेनापि तादृशकल्पनासम्भवात् कारणान्तरकल्पने गौरवाच्च
अन्वयव्यभिचारसन्देहस्य च कारणत्वग्रहाविरोधित्वात् उपादीयन्तां
वा तत्तदात्मसमवेतविशेषसम्बन्धा एव तादृशपूर्ववर्त्तिभिन्नाः भवेद्वा
तत्तत्पुरुषीयानुमितिं प्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादिना
तादृशक्षणवर्त्तित्वविशिष्टत्वादिना वा कारणत्वं तथा चोपमानादेः प्रमा-
णान्तरत्वं भज्येत सर्वत्रानुमितिसामग्रीसम्भवात् विलीयेत च परामर्श
त्वादिना कारणत्वं बाधकत्वादिना च प्रतिबन्धकत्वम् अनयैव रीत्या
कार्यान्तरेष्वपि क्लृप्तानां कारणानां प्रतिबन्धकानाञ्च तथात्वमक्लृप्ता
नाञ्च तथात्वं प्रसज्येत अतएव न द्वितीयोऽपि प्रकारः वैयर्थ्याच्च
सिद्धेः। सिषाधयिषाविरहविशिष्टस्य सिद्धप्रमाणातिरिक्तसाधक
मानयोरन्यतरस्याभावः कारणमिति तु केचित्तन्न साधकमानं हि
सिद्धिस्वरूपयोग्यं तदुपहितं तत्सामग्री वा नाद्यः चक्षुरादिसत्त्वे
विनानुमितीच्छामनुमित्यभावप्रसङ्गात् न द्वितीयः सिद्धेः पूर्वं तदुप-
हितत्वाभावेन प्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यापत्तेः अनुमानातिरिक्ते
त्यस्य वैयर्थ्याच्च न तृतीयः अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारण
त्वम् अनुमित्साविरहविशिष्टप्रत्यक्षसामग्र्यभावत्वेन चानुमितिकारण
त्वमित्यन्योन्याश्रयात् स्थाणुत्वाभावव्याप्यदर्शनक्षणे प्रतियोग्यारोप-
विरहिणाभावप्रत्यक्षसामग्रीविरहात् पक्षतासत्त्वे स्थाणुत्वारोपक्षणे
तदभावानुमित्यापत्तेरित्यपि कश्चित् वस्तुतस्तु स्वतन्त्रान्वयव्यतिरेक
शालित्वाद्विषयेण प्रथममुपस्थितत्वाल्लाघवाच्च प्रत्येकमेव तथात्वम-
न्यथा बाधादेरप्येवमन्तर्भावप्रसङ्गात् न चानुमित्साविरहस्य प्रत्येकं
विशेषणत्वे गौरवं शाब्दसिद्धौ सत्यामशाब्दं ज्ञानं जायतामिती-
च्छायामनुमितेरुत्पादात् सिद्धावनुमितिविषयेच्छाविरहस्य प्रत्यक्षसा-
मग्रीसत्त्वे च तादृशेच्छायामनुमित्यनुत्पादात् साधकमाने अनुमिति

त्वादिप्रकारकेच्छाविरहस्य पृथगेव विशेषणतायोग्यतयापि वाच्यत्वात्
तन्निवर्त्तकप्रत्यक्षादिसामग्रीसमवहितान्यत्वादिना च तादृशेच्छयोरनु
गमेऽतीव गौरवम् अन्यतरत्वघटकयोरन्योन्याभावयो र्मिथोविशे-
षणविशेष्यभावे विनिगमकाभावश्च आत्मनिष्ठस्य समवायेन सिद्धेर-
भावः भिन्नभिन्नेन च सम्बन्धेन तत्तदसाधारणकारणघटिताया स्तत्सा-
मग्र्याः तत्तद्विशिष्टस्य तत्तदितरेतरविशिष्टस्य संयोगादेः प्रति
बन्धकत्वायोगात् तथा च कथमनुगतरूपेण तयोरभावः कारणं एवं
सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यमेककालावच्छेदेनैकालिकत्वं
प्रत्यक्षादिकारणचक्षुः संयोगादेश्चान्यादृशमितिसामग्रीविशेषाभावस्य
हेतुत्वेपि लाघवात्सिद्ध्यभावस्य पक्षताव्यवहारनिमित्तं एतदभिस-
न्धाय प्रवृत्तिनिमित्तमुक्तमिति वक्ष्यति पक्षतानुपस्थितसिद्धौ चाविरह
विशिष्टसिद्ध्यभावापेक्षया बाधाभावस्य लघुत्वेपि सिद्धसाधनस्थल
पक्षताव्यवहारविरहेण तादृशसिद्ध्यभावस्यावश्यकत्वे बाधाभावो न
निविशते गौरवात् विशिष्टसिद्ध्यभावस्य आत्मनिष्ठस्यैवानुमितिहेतु
त्वेपि तस्य परम्परासम्बन्धादेव पर्व्वतादौ पक्षताव्यवहार इति ध्येयम्
एकस्य पुंसोऽनुमित्सासत्त्वेपि अन्यस्य तद्विरहिणः प्रत्यक्षादिसामग्री
सत्त्वेऽनुमित्यनुत्पादात् तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषीयानुमित्सा
विरहकालीनतत्तत्पुरुषीयसिद्धिसामग्रीविशेषविरहोऽनन्यगतिकत्वे-
न हेतुरपेतव्य इति वदन्ति । अथ सिद्ध्युत्तरानुमितौ सिषाधयिषा-
हेतुरस्तु नचैवं मण्यादिक्षणीयदाहं प्रत्युत्तेजकस्य हेतुतापत्तिः
उत्तेजकानामननुगतत्वात् तावदभावविशिष्टमण्याद्यभावस्य चानुगत
त्वादिति चेदित्थमपि दर्शितोऽननुगमः सिषाधयिषायाः सिद्ध्युत्तरानु
मितिमात्रानुगमानतिप्रसक्तं दुर्व्वचं सिद्धिस्थितिकालीनां स्वेतर-
सिद्धिकालीनां वानुमितिं प्रति हेतुत्वकल्पने च विनापि सिषाध-
यिषां सिद्धिनाशकालेऽनुमित्युत्पादाद्दुर्व्वारः एकस्य च पुंसः सिद्धि
कालेऽन्यस्य सिषाधयिषाशून्यस्यानुमित्यनुत्पादप्रसङ्गः तत्तत्पुरुषीय

तादृशानुमितिं प्रति सिषाधयिषाया हेतुत्वेऽनन्तकार्य्यकारणभावप्रसङ्गः अपि च सिद्धौ सत्यां विनापि सिषाधयिषां सामान्यसामग्रीतोऽनुमितिसामान्योत्पत्तिप्रसङ्गात् न हि तादृशविशेषसामग्रीं विना सामान्यसामग्र्या अनुमितिजनकत्वं नास्ति न चान्यत्रापि तद्विशेषसामग्र्यन्तरमस्तीति तत्कल्पने चातिगौरवं इह जायमाना सा सिद्ध्युत्तरैव स्यात् सा च न जायते कारणाभावादिति चेत् समानाजकिष्टानुमितिसामान्यन्तु स्यादेव कार्य्यात्वादविरहस्य विना कारणाभावमसम्भवात् करणव्यापारत्वेनावश्यककारणाभावस्य परामर्शस्य कारणतावच्छेदिका पक्षता न कारणमिति तु भ्रमः प्रतिबन्धकान्तराभाववदन्वयव्यतिरेकशालित्वेन हेतुत्वात् अन्यथा यथासम्भवनिमित्तकारणस्य समवायिकारणत्वाद्यवच्छेदकत्वप्रसङ्गात् अथानुमितिसाधारणसिद्धेः प्रतिबन्धकत्वे तदभावस्य मण्याद्यभाववत् प्रतिबन्धकाभावत्वेन कार्य्यकालवृत्तेरेव हेतुत्वात् अनुमितिकाले च तदसम्भवात् सा नोत्पद्येतेति चेन्न यस्य मण्याद्यभावादेः कार्य्यसमकालतयान्वयव्यतिरेकित्वं तस्यैव तथात्वेन हेतुत्वं न तु सर्व्वस्य गौरवात् अन्यथा समवायिकारणस्य कार्य्यसहभूतस्यैव हेतुत्वात् कारणमात्रस्य तथात्वप्रसङ्गो प्राभाकरा एव विजयेरन्निति । प्राभाकरास्तु विनाप्यनुमित्सां क्वचित् परामर्शानुमितिप्रवाहस्याविरलस्यानुभविकत्वात् कालभेदकल्पनायाञ्च मानाभावात् मानाभावाच्च पक्षता नानुमितिहेतुः परार्थानुमाने तु सिद्धसाधनमर्थान्तरविधया दूषणमित्याहुः ।

पक्षतोपोद्घातेन विशिष्टज्ञानस्य कारणत्वं व्यवस्थापयति पक्षेत्यादि । व्याप्तिस्मरणेति स्मरणत्वमविवक्षितम् अव्यापकत्वात् लाघवात् प्रथमोपस्थितत्वलाघवात् । कल्पनालाघवमाह परामर्शेति परामर्शहेतुत्ववादिनाप्यनुमितेः पूर्व्वं तादृशज्ञानमवश्यं मन्तव्यं तथा चातिरिक्तधर्म्मिणस्तदनन्यथासिद्धत्वनियतपूर्व्ववर्त्तित्वयोश्च कल्पनासापेक्ष्य उभयवादिसिद्धनियतपूर्व्ववर्त्तिनोऽनन्यथासिद्धत्वमात्रकल्पना

लघीयसीति । ननु धूमत्वावच्छेदेन व्याप्तेरालोकत्वेन च पक्षधर्म्मतया ग्रहेऽप्यनुमितिः स्यादित्यत आह एवमिति यद्धर्म्मावच्छेदेन व्याप्तिज्ञानं तेनैव रूपेण पक्षधर्म्मताज्ञानं हेतुरिति नातिप्रसङ्गः ज्ञानद्वयादिति द्वित्वमविवक्षितं लाघवात् अवच्छेदकलाघवात् आवश्यकत्वात् व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानस्य हेतुत्वे व्याप्तिज्ञानहेतुताया आवश्यकत्वात् । क्वचिदुपजीव्यत्वादिति पाठः उपजीव्यत्वञ्च व्याप्तिज्ञानं विना यद्धर्म्मावच्छेदेन व्याप्तिज्ञानं तत्प्रकारकपक्षधर्म्मताज्ञानस्यासम्भवात् एवञ्च सिद्धे व्याप्तिज्ञाने हेतावतिप्रसङ्गभङ्गाय पक्षधर्म्मताविषयत्वमवच्छेदकं कल्प्यते लाघवात् नतु कारणान्तरं गौरवादिति भावः । सिद्धस्य व्याप्तिज्ञानस्य न पक्षधर्म्मताविषयत्वमित्याशयेनाह तस्येति । यद्वा व्याप्यवत्ज्ञानमिति व्याप्यत्वप्रकारकं पक्षधर्म्मताज्ञानमित्यर्थः । ननु विशिष्टज्ञानान्यथानुपपत्त्या ज्ञानद्वयस्यावश्यं वाच्यतया तस्यैव हेतुत्वं युक्तं तदिदमुक्तमावश्यकत्वादित्यत आह उपजीव्यत्वादिति विशिष्टज्ञानान्यथानुपपत्त्या तत्कल्पने विशिष्टज्ञानस्योपजीव्यत्वादित्यर्थः । स्वसम्वेदनसिद्धमेव ज्ञानद्वयं आवश्यकत्वञ्च तस्योभयवादिसिद्धमित्याशयेनाह तस्येति । असिद्धिं परिजिहीर्षुराशङ्कते अथेति अयं पक्षवृत्तिः हेतुरिति लाघवादिति शेषः । अनुमितिसामग्र्यामिति स्मृतिहेतुतावादिनां नव्यानां नये दूषणमिदं नतु संस्कारकारणतावादिनां प्राचामिति । अथेत्यादि अत्र यत्र प्रथमं पक्षाग्रहे गृहीतधूमे स्मृतव्याप्तिविशिष्टप्रमानन्तरञ्च गृहीते पक्षे तादृशविशिष्टधी सम्भवत्यपि द्रष्टव्यम् । प्रथमत इति विशिष्टज्ञानात् पूर्व्वमनुमितिसामग्रीविरहप्रदर्शनाय । एवञ्च सिद्धे पूर्व्ववर्त्तिनि विशिष्टज्ञाने सत्यैव तत्त्वेन हेतुत्वं गुरुधर्म्मद्वयावच्छेदेनानन्यथासिद्धत्वकल्पनामपेक्ष्य लघुरूपावच्छेदेन नियमानन्यथासिद्धिकल्पनाया एव न्याय्यत्वात् गृहीतव्याप्यतावच्छेदकताकधर्म्मप्रकारकपक्षधर्म्मताज्ञानत्वेन पक्षधर्म्मताग्रहप्रकारीभवद्धर्म्मावच्छिन्न

व्याप्तिज्ञानत्वेन वैजात्येन कारणत्वे चातिगौरवात् विनिगमनाविरहाच्च तथापि च नियतपूर्ववर्त्तित्वं कल्प्यमित्याह यत्र चेति। तेन विनेति तथा च व्यभिचारात्कारणत्वं बाधितमितिभावः। एतद्व्यभिचारं निरस्यति अनुद्भूतेति। अनवस्थानादिति। नच धूमान्तरसन्निकर्षे तद्व्यक्तिवृत्तिधूमत्वं वह्निव्याप्यमिति लिङ्गविशेष्यक परामर्शाद्यात्मानुमितिसम्भवः धूममात्रसन्निकर्षेऽपि तत्र वह्न्यनुमानात् तद्व्यक्तिवृत्तित्वधूमत्वत्ववैशिष्ट्यग्राहकाविरहाच्च असाधारणमिति शरीरादिव्युदासः आलोकादिवारणाय प्रमाणान्तरासहकारीति वाच्यं तदपि प्रमाणान्तरं भवत्येव प्रत्यक्षादिप्रमाकारणत्वेन च विभागान्न तद्व्याघातइत्यपि कश्चित्। यद्वा असाधारणमसमवहितं तथा च यज्जातीयप्रमायां मनोऽन्यकरणेनासमवहितं सत् यद्बहिर्विषयकप्रमोत्पादकं यज्जातीयप्रमासामग्रीविरहे वा यत्प्रमोत्पादकं तत्तद्विजातीयप्रमाहेतुरित्येव व्याप्तिः ततः सिद्धायां विलक्षणप्रमायां विलक्षणे च तत्करणे कल्पनीये आवश्यकत्वाद्बाधकाभावाच्च तस्यैव तथात्वं पर्यवस्यतीति। संशयस्वप्नौ च न विशिष्टानुभवरूपौ येनोपनयादिवशाद्बहिर्विषयानुभवजनने स्मृत्युपस्थितेन मनसा दोषवशादप्रमेव तदभावादिवशात् प्रमापि जनयितव्येत्याशङ्क्येत किन्तु धर्म्मिज्ञानकोटिस्मरणादिरूपौ धर्म्मिज्ञानं पुनरनुभवरूपं यथासम्भवमक्षादेः करणाच्च संस्कारादित्याशयेनाह संशयेति। व्याप्यत्वानुमानादिति धूमत्वादौ वह्न्यादिव्याप्तिव्याप्यत्वं ज्ञानतो धूमत्वत्वादिना तद्व्यक्तित्वयद्दशायामन्यतावत्संसर्गाग्रहादेवेति। अतीन्द्रियादौ लिङ्गे व्याप्यत्वप्रकारकज्ञानस्यासम्भवेऽप्यनुमितेः सर्व्वानुभवसिद्धतया तस्य कारणत्वे बाधितेति परिशेषादुरीरपि व्याप्यतावच्छेदकप्रकारकज्ञानस्य हेतुत्वे सिद्धे शाब्दव्याप्यवत्ताबोधस्थलेऽपि तत्कल्पने कारणं विना कार्य्योत्पत्त्यसम्भवात् तेन च विना तत्रानुमितेरसिद्धत्वान्न तस्यापि हेतुताबाधः तथातीन्द्रियलिङ्गादौ सर्व्वानुभवसिद्धाया अप्यनुमितेः सर्वथैवापलापः

मम तु कश्चित्कालविलम्बादिमात्रकल्पनमित्याशयवानाह अतएवेति तुल्यमित्यभ्युपगमवादः यच्च यदवच्छिन्ने यस्याहि तदभावेन तदभाव व्याप्यतया गृहीतेन वा विशिष्टेन तत्संशयः तथा यदवच्छेदेन तद्भाववर्त्त कधर्म्मदर्शनं तद्विशिष्टेऽपि अनुभववलाद्भाववर्त्तकस्य तदभावो यदव-च्छेदेन वा तदभावोऽवगतो यो वा तदभावव्याप्यत्वेन गृहीतः यथा स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन ग्रहे पुरुषत्वस्य स्थाणुत्वाभाव व्याप्यत्वेन गृहीतस्य करादेर्वा इदन्त्वावच्छेदेन ग्रहे पुरुषोऽयं स्थाणुर्न वेति न संशयः तदभावादिवच्च तदन्योन्याभावादिस्तादात्म्येन संशये च तदन्योन्याभावादिरपि द्रष्टव्यः एवं न तद्भ्रमोपि विशेषदर्शनस्य विपरीतज्ञानमात्रविरोधित्वादित्यग्रे व्यक्तीभविष्यति । नन्वित्यादि इदं नोभयत्वेन प्रतीयमानं भावोऽभावो वा भावत्वाभावत्वयोस्तत्त्वयो रित्यर्थः लिङ्गत्वाभावादप्रसिद्धत्वेन तत्त्वासम्भवात् भावत्वाभावत्वे त्यादिकं केवलान्वय्यनुमानमतिरिक्ताभावमभ्युपेत्य केवलान्वयिनः साध्यस्य धर्म्ममात्रमेव व्याप्यमिति तु द्रष्टव्यम् । एवमिति लिङ्गं व्याप्य त्वे साध्ये लिङ्गतावच्छेदकं वा वह्नेः । व्यतिरेकेति यत्संशयव्यतिरेक निश्चयावित्यत्र व्याख्याततत्त्वमेतत् यदा तद्व्यतिरेकनिश्चये कार्य्यानु-त्पत्तौ तद्व्यतिरेकनिश्चयाभावस्य कारणतामपेक्ष्य तन्निश्चयस्यैव कार-णत्वं युक्तं लाघवादित्यभिप्रायकमिदम् अतएव कार्य्यनियतपूर्व्वभाव-तया भेदग्रहाभाव एवानुमितिहेतुरित्यभिप्रेत्याह तु वेत्यादि वक्ष्यति । सामान्यतो विशेषदर्शनात् सामान्यतो भ्रमो न स्यात् विशेषतस्तु स्यादे-वेत्यभिप्रायिकामाशङ्कां निरस्यति न चेति अस्तु वेत्यभ्युपगमवादः । नचेत्यादि अभेदज्ञानस्याहेतुत्वे भेदग्रहो न प्रतिबन्धको भवितुमर्हती त्यर्थः । अभेदेति तथाप्यतथाभूतस्यापि प्रतिबन्धकत्वमनायत्या वक्तव्य मिति भावः । अतथाभूतत्वस्य सन्दिग्धत्वे व्यभिचारमाह तथापीति विशेषणान्तरदाने चाप्रयोजकत्वमिति भावः । गोत्वे गोपदशक्यताव-

च्छेदकत्वविशेषितं विशेषितं वा तदस्तीत्यतो मधुरत्वेति मधुरत्व
व्याप्यो धर्म्मो जातिरखण्डोपाधिर्वेतिरुभयोर्न विशेषः। गोरितिस्थाने
गोत्वप्रकारकत्वं विशेषमाशङ्क्याह अन्यथेति। व्यक्तेः प्रकारत्वेऽपि
लिङ्गतावच्छेदकत्वासम्भवादाह गवेतरेति गोत्वत्वस्याप्रवेशाल्लाघवा
श्रयः कुत्र च यथा साध्यं गवेतरासमवेतत्वादिकमेवोपादेयं कालादौ
व्यभिचारवारणाय समवायेन सम्बन्धेन हेतुत्वस्यावश्यवाच्यत्वेना-
भावादिसाधारण्येऽप्यदोषात् व्यतिरेकेऽपि रूपान्तरेण सम्बन्धान्तरेण
च गोत्वाभावस्यापि व्यभिचारितया गवेतरासमवेतस्य तत्त्वेन सम-
वायसम्बन्धेनाभावस्यैव गमकत्वात्।

लिङ्गं लिङ्गतावच्छेदकं तथाच न व्यभिचारः न तथा न तेन
व्यभिचारवारणम्। नहीति धूमान्यान्यत्वमिति दृष्टान्तार्थं न चैक
धर्म्मस्यावच्छेदकत्वापेक्षया धर्म्मद्वयस्य तत्त्वएव गौरवमिति वाच्यं
साक्षादेकधर्म्मघटकानेकभेदादिघटकतया धर्म्मद्वयस्यैव प्रथमोपस्थित-
त्वेन तदवच्छेदकत्वौचित्यात् अन्यथा वह्न्यादीनामपि व्याप्यतया
तावदन्यतमत्वस्यैवावच्छेदकत्वं स्यात्। अन्यथेति विशेषदर्शनं हि
विपरीतज्ञानविरोधितया प्रत्यक्षउपयुज्यते तत्त्वद्वयान्यतरत्वदर्शन-
स्यापि व्यावर्त्तकधर्म्मदर्शनत्वं नाक्षतम् अत्र च तदन्यान्यत्वस्याति-
रिक्तत्वे धूमत्वत्वादेस्तदवृत्तित्वात् धूमत्वादिरूपत्वेऽपि च धूमत्वत्वादे-
रप्रवेशाल्लिङ्गत्वेऽपि न वैयर्थ्यमित्यपि अपास्तम् एवञ्चान्यतरत्वस्य
व्याप्यत्वावच्छेदकत्वे स्थिते तदवच्छेदेन तद्रूपोपगमे तथाप्यन्यथाख्याति
स्वीकारप्रसङ्गः। अस्तु वा गुरुरपि धर्म्मोऽवच्छेदकस्तथापि शुद्ध
व्याप्तिप्रकारकज्ञानस्थले व्यभिचारान्न तस्य हेतुत्वमित्याह किञ्चेति।
वह्नीत्यादि व्याप्तेर्व्याप्यत्वावच्छेदकत्वादिति भावः। मानाभावादिति
वस्तुतो विशेषव्याप्त्यवच्छिन्ना सद्व्याप्तिरतिरिच्यताम् किं तेन न हि
वस्तुतो व्याप्यत्वावच्छेदकप्रकारकं पक्षधर्म्मताज्ञानं हेतुरतिप्रसङ्गात्
परन्तु यदवच्छेदेन व्याप्तिर्गृह्यते तत्प्रकारकम्। न च तदानीं व्याप्यत्व-

च्छेदेन व्याप्तिर्गृह्यते नच तदग्रहेऽनुमितिरुपपादनीया मानाभावात् कल्प्यत्वाविशेषे लघुरूपावच्छिन्नस्यैव नियतपूर्व्ववर्त्तितायाः कल्पयितुं युक्तत्वात् एतेन व्याप्तिग्रहविषयधर्म्मिमात्रवृत्तिधर्म्मप्रकारकं पक्ष धर्म्मताज्ञानं हेतुरित्यपास्तं सामान्यलक्षणानङ्गीकारे धूमत्वादेरपि तथात्वायोगात् वह्निव्याप्यं सर्व्वं प्रमेयं धूमवान् पर्व्वत इति ज्ञानाद- प्यनुमितिप्रसङ्गाच्च व्याप्तिसमानाधिकरणत्वेन तादृशधर्म्मभानोक्तौ च सा, धूमव्यक्तिं वह्निव्याप्येति ज्ञानसहितादुक्तज्ञानात्तत्प्रसङ्गेऽवह्नि व्याप्यवानिति शाब्दज्ञानासंग्रहः अतएव व्याप्यत्वभानांशे प्रकारतया यत्तादृशोधर्म्मोभासते तत्प्रकारकं पक्षधर्म्मताज्ञानं हेतुः वह्निव्याप्य- वानित्यत्र च वह्निव्याप्यत्वमेव तथा धूमवानित्यादौ च धूमत्वादिकं धूम समानाधिकरणत्वादिव्याप्तिज्ञाने तस्यापि प्रकारकत्वादिति परास्तम्। धूमसमानाधिकरणवह्निव्याप्यं सर्व्वं प्रमेयं धूमवानयं प्रमेयत्वव्याप्यं सर्व्वमभिधेयं समानाधिकरणवांश्चायमित्यादिज्ञानादप्यनुमित्यापत्तेः। न च धूमत्वादेरतिरिक्तवृत्तित्वग्रहे एव प्रतिबन्धकः तदग्रहे त्वनु- मिताविष्टापत्तिरिति वाच्यम् एवम्विधेष्टापत्त्यैव सर्व्वत्र प्रतीकारे विशेषणानुसरणवैयर्थ्यात् व्यभिचाराग्रहपक्षधर्म्मताज्ञानयोरेव हेतु त्वस्य सुवचत्वात् किञ्च पुरुषान्तरस्य तस्यैव वा कालान्तरे वर्त्तमानं व्याप्तिग्रहमादायातिप्रसङ्गस्य भङ्गाय स्वसमानकालीनस्वसमानाधि करणव्याप्तिग्रहविषयधर्म्मिमात्रवृत्तिधर्म्मप्रकारकं पक्षधर्म्मताज्ञानं वाच्यं तथा च स्वत्वस्याननुगतत्वात्कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्र पर्य्यवसायित्वे मिथोव्यभिचारः तत्तत्पक्षधर्म्मताज्ञानत्वेनैव हेतुत्व सम्भवेऽधिकवैयर्थ्यञ्च एतेन गृहीतव्याप्यतावच्छेदकताकेत्याद्युपदर्शित प्रकारद्वयमपि प्रत्युक्तं वेदितव्यं एवं यद्धर्म्मावच्छेदेन व्याप्तिज्ञानं तद्ध र्म्मप्रकारकं पक्षधर्म्मताज्ञानं हेतुरित्यपि परास्तम्। तत्तद्धर्म्मविश्रान्त मूर्त्तिकत्वे नाप्यननुगतत्वाच्च यद्येवं तत्साधनताज्ञानस्येच्छाहेतुत्वेऽपि समानमिति चेत् सत्यं प्रतिवक्ष्यते हि तत्र लघुगुरुरूपाभ्यां युगपदुप-

स्थितौ लघुरूपावच्छेदेनैव कारणत्वं कल्प्यते लाघवात् नियमादेरेकतर
रूपावच्छेदेनाप्युपपन्नत्वात् इत्याशयवानाह अपि चेति । ननु स्वसमा-
नाधिकरणाभावे इत्यादिव्याप्तौ स्वपदार्थस्यैकस्याभावेन धूमादिकमेव
विशिष्य उपादेयं तत्र च धूमसमानाधिकरणाभावप्रतियोगितानव-
च्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणेन्धनवानयमिति ज्ञानादप्यनु
मितिप्रसङ्गेन तादृशवह्निसमानाधिकरणधूमत्वं व्याप्तिस्तत्प्रकारकमेव
च पक्षधर्मताज्ञानमननुगतमपि हेतुरिति वक्तव्यं तथा च यद्धर्मवि
शिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके
गृह्यते तत्प्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम् अयं वह्निव्याप्यवान्
धूमो वह्निव्याप्योऽयं धूमवान् वह्निधूमव्यापकोऽयं धूमवानित्यादिसकल
विशिष्टव्यापकत्वात् न तूपदर्शितव्याप्तिप्रकारकज्ञानत्वेनाव्यापकत्वात्
किञ्चान्यथाख्यातिवादिभिः धूमादिसमानाधिकरणात्यन्ताभावाप्रति-
योगिगगनसमानाधिकरणधूमादिमानयमितिज्ञानादनुमित्यङ्गीकारा
दखण्डव्याप्तेरप्रसिद्धतया प्रकारत्वासम्भवात् साध्ये साधनव्यापकत्व
स्याखण्डस्याधिकरणादौ च साध्यीयत्वाद्यवगाहि पक्षे च तादृशसाधनव-
त्त्वावगाहि यज्ज्ञानं तत्त्वेन कारणत्वं वाच्यं तथा च लाघवात्तादृश-
व्यापकत्वपक्षधर्मत्वावगाहित्वयोरेव कारणतावच्छेदकत्वमवृत्तिहेत्वनु-
रोधेन व्यापकत्वस्यापि खण्डशो निरुक्तिरेषां परमतिरिच्यते यथा च
सामानाधिकरण्यज्ञानस्य हेतुत्वेऽपि न क्षतिः तथा वक्ष्यते इति चेन्न
गृह्यमाणव्याप्यतावच्छेदकताकेत्यादिप्रकारद्वयोपादानायत्तत्वात् वह्न्य
त्यन्ताभाववदवृत्तिधर्मवानयमित्यादिज्ञानादप्यनुमित्युदयाच्च व्यभि-
चारज्ञानविरोधिज्ञानविषयत्वेनैव व्याप्तीनामनुगमात् । नन्वत्र कारणे
कार्य्यमेव प्रमाणं तच्च कार्य्यकारणभावग्रहे सति स्यात् स एव तु न
सम्भवति गौरवज्ञानेन प्रतिबन्धादित्यत आह कारणताग्रहेति कारणता
निर्णयं विना तत्फलस्य धर्म्मान्तरनिर्णयस्याभावेन तद्घटितगौरवस्या
निर्णयादित्यर्थः सम्भाव्यते तावदिदं धर्म्मान्तरकल्पनं विना कारणत्व-

स्यैवाप्राक्ष्यनिर्व्वाह्यत्वादिति चेत् सम्भाव्यतां न तु तत्प्रतिबन्धकं सामा-
न्यतः कार्य्यकारणभावग्रहस्य प्रायशो विलयप्रसङ्गात् तत्र तत्र लघु-
नियतपूर्व्ववर्त्तितावच्छेदकरूपान्तरविरहेणागत्या गौरवमप्याश्रीयते
इति चेदिहापि तद्विरहस्यासत्त्वादावेदितत्वादिति कृतं पल्लवितेनेति।
व्यभिचारनिर्णयेन कारणत्वग्रहासम्भवं निरस्यति नचेति। अनुमान-
योरिति अनुमितेरसाध्यविशिष्टे साध्यान्तरानुमित्या सहचारग्रहो-
पगमेऽपि नियमांशग्रहासम्भवादिति भावः। नियतव्यापारेति एक-
सम्बन्धिज्ञानाधीनसम्बन्ध्यन्तरस्मरणादितः क्वचिद्विशिष्टज्ञानोत्पत्ता-
वपि नियतत्वेन न तस्य व्यापारत्वं यं जनयित्वैव यस्य यज्जनकत्वं
तस्यैव तत्र तद्व्यापारत्वादित्यर्थः। वस्तुतस्तु तदुपनयव्यक्त्यादेस्तत्-
प्रमाव्यक्तिं प्रति कारणत्वेऽपि न क्षतिः प्रमावैजात्यस्यैवात्र प्रमाणा-
न्तरनिमित्तत्वात्। नचात्रापि प्रमावैजात्यमनुपलम्भबाधितत्वात्
मानाभावाच्च उपनयस्य च विशिष्टज्ञाने विशेषणज्ञानत्वेन प्रत्यक्षे च
सन्निकर्षविधयोपयोगितया जात्यव्यवस्थापकत्वात् अतएव बाह्यान्तर-
प्रत्यभिज्ञासादृश्याभावादिप्रत्यक्षाणां तत्तत्प्रतियोग्यादिविषयत्वस-
न्यथा जातिसङ्करप्रसङ्गात् ज्ञानद्वयकल्पने च स्थैर्य्यमात्रमुच्छिद्येत
व्यवस्थापितञ्च विशिष्टज्ञानस्य व्यवहारहेतुत्वम्। नच प्रमाणान्तरा-
सहकृतोपनयजन्यतावच्छेदकतया वैजात्यसिद्धिः इतरासहकृतत्वेना-
जनकत्वात् असिद्धेश्च उपनयात्मकसन्निकर्षद्वारेण मनसा प्रत्यक्षजनन-
स्यैवोपगमात्। पृथगिति, नचैवं धारावाहिकोच्छेदः इतरसाभा
विशेषणत्वेनोपस्थितेरेव तन्त्रत्वात् कोटिस्मरणस्य संशयेन तस्य च
व्याप्तिस्मरणादिना नाशात् विशेषदर्शनकाले च संशयायोगादाह न
चेति। गौरवादिति न चैवमभावविशेषणत्वेनोपस्थितस्यापि भावस्य
ग्रहापत्तिरभावग्राहकसामग्र्या बलवत्याः प्रतिबन्धात् अभावाविशे-
षणत्वेनोपस्थितिस्तन्त्रमित्यपि कश्चित् वस्तुतः स्वतन्त्रविशेषणज्ञानस्य
विशिष्टधीहेतुत्वेऽनुमित्यर्थमेव त्वयापि तत्स्वीकरणीयं नहि विशिष्ट-

प्रत्यक्षं प्रत्येव तथात्वं मानाभावात्। तर्हीत्यादि वस्तुतोयत्र क्वचिदपि
गृहीतस्य धर्म्मिणि साधारणधर्म्मदर्शनात् स्मृतस्य संशयादिसाधा-
रणी विशिष्टधीरियांस्तु विशेषो यत्कोटिद्वयसहचरितधर्म्मदर्श-
नात् कोटिद्वयस्मरणे संशयोऽन्यथा त्वेककोटिनिश्चयइति एतेन
धूमत्वादिना पक्षधर्म्मे व्याप्तिमनुमाय वह्न्याद्यनुमितिरिति परास्तम्
धूमत्वत्वाद्यनुपस्थित्या धूमत्वादेर्वह्निव्याप्तिव्याप्यत्वाग्रहे वह्न्यननुमिति
प्रसङ्गाच्च एतेन यद्धर्म्मावच्छेदेन यद्वत्त्वं गृहीतमुपनयवशात् तद्धर्म्म
विशिष्टएव तद्भासते धूमवत्त्वावच्छेदेन च वह्निमत्त्वग्रहाद्धूमवानेव
वह्निमानिति बुद्धिः स्यात् न तु पर्व्वतो वह्निमानित्यपि परास्तं माना
भावात् चन्दनत्वाद्यवच्छेदेन गृहीतस्य सौरभादेः पुरोवर्त्तिनि चन्दन
त्वादिदर्शनादिदं सुरभि इत्यादिबुद्धौ व्यभिचाराच्च यदि चावच्छे-
दकधर्म्मवैशिष्ट्यमपि तत्र भासतइति नियमोपि तत्र प्रामाणिकस्तदा
धूमवानयं पर्व्वतो वह्निमानित्येव धीरस्तु न हि लिङ्गोपधानभाने
बाधकमन्यत्साधकविरहात्। हेतुसाध्येति सम्बन्धिद्वयनिरूप्यपदार्थं
प्रत्यक्षं प्रति सम्बन्धिद्वयप्रत्यक्षस्य हेतुतायाः संयोगादिस्थले त्वयैव
क्लृप्तत्वात् तदनादरेपि साध्यघटितमूर्त्तिकव्याप्तिप्रत्यक्षस्य साध्यप्र-
त्यक्षसामग्रीं विनासम्भवादिति भावः। विशेषणेत्यादि विशेषण
विशेष्यसम्बन्धस्तदंशे प्रमात्वे लौकिकत्वे वा विशेषदर्शनस्य विपरीत
ज्ञानप्रतिबन्धकतया क्वचित् क्वचित्सहचरितधर्म्मदर्शनत्वेन विशेषण
स्मारकतया विशेषणस्य च ज्ञानसत्त्वेऽप्यतिरिक्तसन्निकर्षं तदंशे
लौकिकतायामनुपयुज्यते। एकैव हीति वस्तुतो व्याप्तिभेदेपि न क्षतिः
सामान्यतो व्याप्तित्वेन गृहीतानां सर्व्वासुव्याप्तीनां तथैव स्मरणसम्भ-
वात् वह्नेरसन्निकर्षादिति। ननूपनयात्मकसन्निकर्षेणैव नयनेन निरू
प्यतां ऊताग्नो नहि वह्निरिन्द्रियेण अवयस्याधेयतया तद्वत्त्वस्य वा
ग्रहे तत्संयोगोहेतुः दण्डी पुरुषो नास्तीत्यादौ व्यभिचारात् कथ-
मन्यथा पक्षधर्म्मे वह्निमत्त्वगर्भिता व्याप्तिरेव गृह्यते न चाधेयतया

मुख्यविशेष्ये साक्षात् द्रव्यग्रहे तत्संयोगो हेतुः अभेदारोपे च नाधेयतया रजतादिकं प्रकारः दण्डाद्यात्मकतत्तावगाहिप्रत्यभिज्ञायाश्च तत्तावदभेदोऽभासत इति न दण्डादेः साक्षात्प्रकारतेति वाच्यं मानाभावात् धूमवान् वह्निमानिति सामान्यलक्षणया ग्रहे व्यभिचारात् तत्तासंसर्गस्यापि प्रत्यभिज्ञायां भानसम्भवात् प्रकृतेऽपि वह्निमदभेद ग्रहेणैव कृतार्थत्वाच्च एतेन तत्ताकारानुपनीततादृशद्रव्यग्रहे स हेतुरिति निरस्तं चैत्रपदवाच्योऽयमित्यादिवत् दण्डाग्रयमासीदयं दण्डीत्यादिग्रहस्यानुभविकत्वात् तत्तात्वस्यातिरिक्तस्याभावात् तच्छब्दप्रयोगजननाभावस्य च निमित्तान्तरविरहप्रयुक्तस्य जन्यतानवच्छेदकत्वात् तज्जननयोग्यतायाः प्रकृतेऽपीष्टत्वात् अतएव तदिन्द्रियग्राह्य विद्यमानद्रव्यस्य तेन ग्रहे तत्संयोगो हेतुरिति परास्तम् नयनादिना रजतादेरभावग्रहाभेदारोपादौ व्यभिचाराच्च अथैवं व्यवहितदण्डे पुंसि न कथं नायनो दण्डीति निश्चय इति चेत् क्वचित्तत्सहचरित धर्मादर्शनात् तदस्फुरणात् क्वचिच्च साधारणधर्मदर्शनादिना संशयस्यैव जननात् सति च विशेषदर्शनादाविष्टत्वात् युक्तञ्चैतत् कथमन्यथा दण्डी न वेत्यादिकः संशयः नहि नासौ तद्विशिष्टबुद्धिः न तन्निश्चय इति चेत् किं तेन उक्तं हि संशयत्वं निश्चयत्वञ्च न जन्यतावच्छेदकमिति अस्तु वा तथा तथापि विशेषस्यादर्शनात् संशयस्येव तद्दर्शनान्निश्चयस्यापि सम्भवात् मा भूद्वा नायनादिरयं उताशनादि निर्णयो मानसस्तु स्यात् तत्र तादृशनियमस्यात्यन्तं बाधितत्वादिति।

उच्यते। अस्ति तावदनुमिनोमीत्यनुव्यवसायसाक्षिको ज्ञानविशेषो यत्र कारणमन्वयव्यतिरेकाभ्यां व्याप्यधर्मधीः मानसप्रत्यक्षविशेषोऽसाविति चेत् कुतोऽस्य प्रत्यक्षत्वमनुभवत्वादिति चेत् किमेयमनुभवत्वमन्यत् प्रत्यक्षत्वात् स्मृत्यन्यज्ञानत्वमिति चेन्न अप्रयोजकत्वात् अनुमितौ साक्षात्कारित्वग्रहप्रसङ्गाच्च तद्ग्राहकलौकिकसन्निकर्षादिजन्यत्वविरहान्न तथेति चेदात्मानुमितौ तस्यापि सम्भवात् वह्निमनुमिनोमि

न तु साक्षात्करोमीत्यबाधितसाक्षात्कारत्वाभावग्रहाच्च अगत्या तु सौरभं न पश्यामीत्यादावन्यथात्वकल्पनं सामान्यलक्षणानङ्गीकारे नये चाप्रसिद्धवह्न्यादिव्याप्तिकानुमितौ न प्रत्यक्षत्वसम्भावनापि सन्निकर्षासम्भवात् एतेन शाब्दादिकं व्याख्यातं व्यवस्थापयिष्यते तावदप्रसिद्धाभावसाध्यकानुमितिरपि च साक्षात्कारिणी तथोपनयस्यासम्भवात् एवञ्च प्रसिद्धसाध्यकानुमितेरपि न साक्षात्त्वं जातिसङ्करप्रसङ्गादित्यपि केचित् तत्र भेदत्वादिनोपस्थिते जलादिप्रतियोगित्वग्रह इत्यपरे । मानाभावादिति तन्निष्ठावच्छेदकान्तरग्रहमन्तरेणासम्भवाच्चेत्यपि द्रष्टव्यम् । उपसंहरति तस्मादिति वाशब्दोऽनास्थायाम् उभयथापि प्रश्नताद्वृत्तेः वस्तुतो व्याप्यपक्षयोर्वैशिष्ट्यावगाहिज्ञानत्वेन हेतुत्वं विनिगमनाविरहेणान्यतरविशेषणविशेष्यभावस्यातन्त्रत्वात् । लाघवादिति अयाव्याप्यवृत्तेर्व्यापकत्वसम्पत्तयेऽभावस्य प्रतियोग्यसामानाधिकरण्यं वाच्यं तच्च स्वप्रतियोग्यनधिकरणावृत्तित्वम् एवञ्चावृत्तिगगनादेर्धर्म्मेमात्रव्यापकत्वं स्यात् तादृशघटत्वाद्यभावाप्रतियोगित्वात् तदधिकरणाप्रसिद्ध्या च तदभावस्य स्वप्रतियोग्यनधिकरणावृत्तित्वासम्भवात् तथा च तद्व्यावृत्तये व्यापके हेतुसामानाधिकरण्यं वाच्यं नचैवं हेतोर्व्यापकसामानाधिकरण्यापेक्षया लाघवमिति चेदस्तु तावदेव मायातु तथापि वृत्तिमत्त्वमात्रमुपादेयं । नचैवं हेतोः साध्यसामानाधिकरण्यस्य संशये व्यतिरेकनिश्चये वा अनुमित्यापत्तिरिति वाच्यं संशये इष्टत्वात् व्यतिरेकनिश्चये च पक्षधर्म्मताग्रहे परामर्शविरहात् तद्ग्रहे च साध्यासमानाधिकरणधर्म्मान्तरग्रहस्येव तस्यापि विरोधित्वात् अन्यथातिप्रसक्तत्वात् पर्व्वतो वह्निव्याप्यधूमवान् पाषाणमयः पाषाणमयावृत्तिश्च वह्निरितिज्ञानेन च तुल्ययोगक्षेमं पर्व्वतवृत्तिधूमव्यापको वह्निर्धूमवदवृत्तिश्चेति ज्ञानम् । नच साध्यप्रतियोगिकस्य समानाधिकरणयावदत्यन्ताभाववत्त्वं साध्यप्रतियोगिकत्वावच्छेदकस्य समानाधिकरणात्यन्ताभावत्वकत्वं वा व्याप्तिः साध्यप्रतियोगित्वस्य

केवलान्वयिनि साध्यस्यान्योन्याभावे सम्बन्धविशेषावच्छिन्नात्यन्ताभावे
वा प्रसिद्धमिति वाच्यं गौरवात् व्यापकत्वाद्यन्तर्भावेन वाक्यस्य
दुर्बलत्वात् प्रमाणाभावेन स्वरूपसम्बन्धविशेषरूपत्वासम्भवेनावच्छेदक
त्वज्ञानविरहिणां व्याप्तित्वपर्यवसायित्वाच्च व्यापकतायाश्च प्रतियोगि-
त्वादेः सामान्याभावस्याज्ञातत्वात् सम्बन्धादिभिन्नसाध्यप्रतियोगित्व-
व्यतिरेकाभावस्य व्यभिचारिसाधनसमानाधिकरणयावदत्यन्ताभाववृत्ति
तया त्वयापि तस्यावश्यं वाच्यत्वात् साधनसमानाधिकरणात्यन्ताभाव
प्रतियोगितानवच्छेदकधर्म्मवत्त्वरूपव्यापकत्वज्ञानमपेक्ष्य साध्यवदन्या
वृत्तित्वज्ञानस्य लघुत्वात् । तद्धेतुतावादिनं निरस्यति अतएवेत्यादिना
बोध्यासमभिव्याहारादिवशादुद्देश्य धर्म्मवृत्तेरत्यन्ताभावस्यान्योन्या
भावस्य वा प्रतियोगित्वाभावो विधेयधर्म्मे तद्वति वा भासते ननु
विधेयधर्म्मतद्वतोरत्यन्तान्योन्याभावानधिकरणत्वमुद्देश्य धर्म्मवति यत
दभिधेयं तत्प्रमेयमित्यादावसम्भवादिति भावः । साध्येति अयोगो
ऽभावप्रतियोगित्वं तथाच साध्ये साधनवन्निष्ठाभावप्रतियोगित्वव्यव-
च्छेदेनेत्यर्थः । स्यादिति न स्याच्च केवलान्वय्यनुमानमित्यपि द्रष्टव्यम् ।
न चेदिति एतच्च विरोधस्यातिस्फुटत्वमभिसन्धाय साध्याभाववद्वृत्ति
त्वबुद्धेरपि व्यापकताधीविरोधित्वादिति वदन्ति । मानसत्वेति प्रायि-
कत्वाभिप्रायेण तेन क्वचिच्छब्दादिना क्वचिच्च साध्येन्द्रियसन्निकर्षात्
परामर्शेऽपि न क्षतिः पक्षसाध्यसम्बन्धस्याग्रहात् यद्वेष्यनुमित्याद्यनु-
मितिसम्भवात् । व्यभिचारादिति नच यत्र यदुभयवैशिष्ट्यावगाहि
ज्ञानं कारणं तत्र तदेकतरोपसर्ज्जनस्यान्यतरस्य अन्यत्राने प्राधान्येन
न भानमिति वाच्यं मानाभावात् अत एवेदमङ्कुरसबीजं पक्षधर्म्मसमा-
नाधिकरणाभावप्रतियोगित्वेनाभावज्ञानं वह्न्यादावभ्रान्तसम्भावि
ताद्यप्रतियोगित्वप्रतियोगिताकाभावावगाहि व्याप्तिप्रकारकं पक्षधर्म्म
धूमसमानाधिकरणाभावप्रतियोगित्वेन च तज्ज्ञानं न व्यापकं येन

रूपेण पक्षधर्म्मताग्रहस्तद्रूपावच्छिन्नव्यापकताज्ञानञ्च मीमांसकमत निरासेनैव निरस्तमिति स्वर्गकामो यजेतेत्यादावन्वयबोधं ग्रन्थमपि दीधितौ विवेचयिष्यामः ।

परिच्छायकञ्च परिच्छेयव्यावर्त्तकत्वं तच्च नोपपद्यतयेत्याह परि-च्छेयइति । विशेषणतया तच्चे पुनराह तथाचेति । अवच्छेदकता साध्ये चान्यथासिद्धावाह अन्यथेति । अपिचेत्यादि या यद्विशेषण समानकालीनत्वेन तादृशी बुद्धिः सा ज्ञायमानतद्विशेषणजन्येति । सामान्यव्याप्तौ पक्षधर्म्मतासम्पत्तये धूमविशेषणिकेत्यादि तादृशस्या-नुभविकत्वप्रदर्शनाय च धूमवानित्यादि ज्ञायमानेति च तज्ज्ञानस्यापि जनकत्वलाभाय साध्यविशिष्टानुमितेः साध्याजन्यत्वाद्विशेषणसमान कालत्वेति धूमकालीनवह्निमान् धूमध्वंसादित्यनुमितेः धूमाजन्यत्वात् विशेष्येति विशेष्ये विशेषणभावापन्नं यत्समानकालीनत्वेन धर्म्मान्तर वैशिष्ट्यावगाहीत्यर्थः तदानीं धूमवान् पर्व्वतो धूमकालीनवह्निमान् धूमध्वंसवत्त्वादित्यादौ च विशेषणे विशेषणतापन्नस्यैव धूमस्य समान कालत्वं वह्नौ भासते न तु विशेष्ये तथात्वापन्नस्य अनुभवसिद्धोऽयं विशिष्टवैशिष्ट्यबुद्धीनां विशेषणताविशेषः विशेषणं धर्म्मितावच्छेदकं विशेष्यञ्च विधेयम् तथाच विधेयतावच्छेदकावच्छिन्नं यद्धर्म्मविशिष्टे तत्समानकालीनत्वेनावगाहते या अप्रामाणी बुद्धिः सा तद्धर्म्मजन्येति पर्य्यवसितोऽर्थः धूमकालीनवह्निमानित्यादौ च विधेयतावच्छेदकधूम कालीनवह्नित्वावच्छिन्नं न धूमकालीनत्वेन भासते परन्तु वह्नित्वाव-च्छिन्नं धूमवानयं धूमकालीनवह्निमान् पर्व्वतो वह्निमानालोकादि-त्यादौ च न धूमध्वंसविशिष्टे धूमकालीनवह्निमत्त्वं भासते किन्तु तादृशविशिष्टपक्षतावच्छेदकवति वह्निमत्त्वं सम्बन्धमर्य्यादया तत्समान कालीनत्वमवगाहतइत्यपि वदन्ति । अथवा विशिष्टत्वं व्याहतत्वं तच्च तत्समानकालीनत्वप्रकाराजन्यत्वं विशेषणविशेष्यपदे च धर्म्मद्वय भावोपदर्शके तथाचैवमस्मिन् पक्षे यद्धर्म्मसमानकालत्वप्रकारजन्या

या अप्राप्ती तद्धर्मसमानकालीनत्वमुक्तिः सा प्रागसाभतद्धर्मावच्छि-
न्नार्थः एवं न क्वापि व्यभिचारशङ्का साध्यस्य पक्षतावच्छेदकसमान
कालीनत्वं क्वापि चानुमितिविषयो मानाभावात् । नवीनमते तु
कालादेः पक्षतावच्छेदकत्वे तदवच्छिन्नत्वं साध्यस्य भासतइत्यन्यदेतत्
दग्धो पुरुषो गच्छतीत्यादिशाब्दधीवारणाय अप्राप्ते ति तुल्यन्याय-
तयोपनीतभानवारणाय तदन्यत्वमपि वाच्यमित्यपि वदन्ति एतन्मये
अतीतत्वाद्यवच्छिन्नतीतादिलिङ्गज्ञानाज्जानुमितिरिति अतीतलिङ्गका-
लीनत्वावगाहानुमितौ व्यभिचारः कालोऽत्र वर्त्तमानो विवक्षितः
तदैशिष्ट्यांशे च प्रमात्वं वाच्यं वर्त्तमानत्वं वा तादृशधर्मविशेषणमि-
त्यपि कश्चित् । केचित्तु विशेषणं विशेष्यतावच्छेदकं तथाच वर्त्तमान
विशेष्यतावच्छेदकसमानकालीनतया धर्मान्तरवैशिष्ट्यावगाहिशाब्द
ज्ञानत्वादित्यर्थः ततश्च पक्षतावच्छेदकस्य हेतुत्वमित्यत्र समान
कालीनत्वानुसरणन्तु तादृशविषयत्वे प्रतिबध्यमानविशेष्यतावच्छेदक
जन्यत्वस्य प्रयोजकत्वसूचनायेत्याहुः । परामर्शस्यैवेति नच कारणताव
च्छेदकस्य तस्य न व्यापारता परामृश्यमानत्वेन परामर्शजनकादिति
वाच्यं व्यापारं प्रति रूपान्तरेण हेतुत्वेऽपि फलमपि तद्रूपेण हेतु
तायां विरोधाभावात् लिङ्गत्वे नैवानुमितिहेतुतापरामर्शस्तु व्यापार
मात्रमित्यपि केचित् । परामर्शविषयस्येति विनिगमनाविरहो
विशेषणत्वं वा तस्य हेतुत्वे बीजं नचेदमज्ञायमानेऽस्तीति भावः तत्र
विशिष्टस्य कारणत्वं स्वरूपं प्रमाणं विशेषणतावच्छेदकावच्छेदेनापि
तत्परिच्छिनत्ति तथाचापरामृश्यमानस्यापि लिङ्गत्वेन हेतुत्वमविरुद्ध
मिति वाच्यं यतोहि लिङ्गत्वेन साध्यव्याप्यत्वादिकं तदप्रसिद्धावपि
गगनाद्यनुमानात् नापि परामर्शविषयतावच्छेदकमात्रं तथा सति
वस्तुमात्रस्य वानुमितिहेतुतापत्तेः नचेदं प्रामाणिकं तथान्वयव्यतिरे-
कादिविरहात् अन्यथेच्छाशाब्दबोधादिकं प्रतीत्साधनताप्रयुक्तवि
कुण्ठितसिद्धिकस्य अगत्यैव हेतुताप्रसक्तेः नवा वाक्यतो विनिगमना

विरहेऽपि प्रमेयत्वादिना ज्ञातादपि लिङ्गादनुमित्यापत्तेः व्याप्तिपक्षधर्म्म-
त्वेन ज्ञायमानयोस्तयोश्च व्याप्यत्वाद्यप्रज्ञानत्वेनैव हेतुत्वात् । किञ्च
ज्ञानान्तरीयत्वाद्यप्रज्ञानविषयादपि लिङ्गादनुमितिप्रसङ्गः कारण-
तावच्छेदकावच्छिन्नकारणसत्त्वस्यैव कार्य्योत्पत्तिनियामकत्वान्न तु यदि
ञ्चित्सत्त्वस्यैव गौरवात् अतोऽपि च प्रतिबन्धकाभावादीनां न कारण
तावच्छेदकत्वं परामर्शविशिष्टसत्त्वस्य चाप्रयोजकत्वाभिधाने साध्य-
वादावप्रयोजकत्वाच्च परामर्शस्यैव तथात्वं तत्र च नातिप्रसङ्गशङ्कापि ।
अथैवं संयुक्तेन्द्रियादीन्द्रियसंयोगादेः कारणतायामपीदमेव विनि-
गमकं स्यादिति चेत्स्यादेव यदि न स्यातामिन्द्रियादेः स्वसत्त्वान्वय
व्यतिरेकौ स्यान्न व्यापारेण व्यापारिणोऽव्यवधानम् नचानुमितिनाश्ये
तौ लिङ्गस्य नचातीन्द्रियस्यापि तस्य परामर्शो व्यापारइति । अपि
च चैत्रेण परामृश्यमाणाल्लिङ्गादपरामृशतोऽपि मैत्रस्यानुमित्यापत्तिः
तत्तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषपरामृश्यमाणलिङ्गत्वेन हेतुत्वे
चानन्तकार्य्यकारणभावप्रसङ्गः इच्छाकृतिसुखदुःखस्मरण विशिष्ट-
ज्ञानशब्दबोधादिषु ज्ञानेच्छाधर्म्माधर्म्मनिर्यायविशेषणभागपदार्थ
ज्ञानादीनामिवानुमितौ परामर्शस्याप्येकार्थप्रत्यासत्त्या हेतुत्वान्नाति
प्रसङ्गशङ्कापीति ज्ञातं पक्षवितेन । एकान्योन्याभावविशिष्टापरा-
न्योन्याभावादिवर्त्तमानत्वं सर्व्वत्र हेतुः सम्भवतीत्यत आह यदि
चेति । किन्तु तत्प्रागभावइति तस्य च विरोधिकालावच्छेदेन व्याप्यत्व-
ग्रहाच्च तत्कालीनसाध्यसिद्धिरिति भावः । अपिचेत्याद्यभ्युपगमवादः
नियतसामानाधिकरण्यरूपायाः व्याप्तेः प्रागभावादौ दुरुपपादत्वात्
धूमप्रागभावत्वादिकं नावच्छेदकमिति चेत् किञ्चातः नचैतदपि व्याप्ते
रवच्छिन्नत्वनियमात् परिशेषेण तस्यैव तथात्वात् अन्यथा धूमादि-
व्यक्तिव्याप्तीनामपि धूमत्वादिकमवच्छेदकं न स्यात् । अथ स्वव्यापक
समानाधिकरणं व्याप्यं व्यापकत्वञ्च तद्धर्म्मविशिष्टसमानाधिकरणा-
भावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत्त्वादिकं तच्च विशे-

मतं धर्म्मो व्याप्त्यवच्छेदकः। नच धूमप्रागभावसमानाधिकरणाभावप्रति
योगितावच्छेदकं प्रतियोगितावच्छेदकं गौरवादपि तु धूमसमानाधि
करणाभावप्रतियोगितावच्छेदकत्वमेव लाघवात् एवञ्च न धूमप्रागभावो
व्याप्यो न वा तत्त्वं व्याप्त्यवच्छेदकम् अतएव प्रमेयधूमत्वादिकमपि
नावच्छेदकमिति चेत् मतं तर्हि जातिसत्तानियतोपाधिगुरुत्वादीनां व्याप्य
त्वेन लाघवेन गोत्वादिनिष्ठाभावप्रतियोगितात्वादेरवच्छेदकत्वात्
नतु साक्षात्तद्वादिनिष्ठाभावप्रतियोगितात्वादेर्गौरवात् प्रतियोगि
गोत्वादिकमिति धर्म्मोगामवच्छेदकत्वेन व्याप्यत्वञ्च ते नीलधूमत्वादे
र्व्याप्त्यवच्छेदकत्वेन नीलधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकाभाव
स्यातिरिक्तत्वात् प्रमेयधूमत्वादिना वक्रव्याप्यव्यापकत्वार्थमिव वह्न्या
दिना व्याप्यत्वार्थमपि अनुगतसाधारणस्यावच्छेदकत्वस्योपादाने कुत
श्चदोषइति। तथापीति तत्रैव गृहीतसामान्यकारणता विशेषस्यैव
हेतुत्वं यत्र अन्यथाकारणतावच्छेदकमपेक्ष्य न गौरवम् अन्यथा विशेष
कारणतात्पविषयप्रसङ्गादिति भावः। धूमवान्वह्नेरित्यादि सामा-
नाधिकरण्ये कालविशेषस्यापि सम्बन्धघटकतया प्रविष्टत्वादित्यर्थः।
यदा यत्रेति कालिकदैशिकव्याप्तिद्वयज्ञानात्कालदेशयोः साध्यं सिध्य
तीति बाधके पक्षवादेर्वह्निव विध्यतीत्यपि वदन्ति। पक्षतावच्छेद-
केति पक्षतावच्छेदककालावच्छिन्नमित्यर्थः। किन्तु व्याप्तीति नच
स्मरणात्मकपरामर्शस्थले तदसम्भवः तत्र व्याप्तिविशिष्टानुभवस्य संस्कार
द्वारा परामर्शहेतुत्वात् फलाजनकव्यापारस्य फलजनकव्यापारजनक
त्वे विरोधाभावात्। नच विशिष्टपरामर्शत्वेन न कारणत्वं व्याप्ति-
ज्ञानत्वेन च न तद्विशिष्टज्ञानं प्रति हेतुत्वं न वा विशिष्टज्ञानत्वेनानु-
मितिहेतुत्वमिति वाच्यम् व्याप्तिविषयकज्ञानत्वज्ञानत्वाभ्यां विशिष्ट
विषयकत्वज्ञानत्वाभ्यां वा हेतुहेतुमद्भावेपि व्यापारव्यापारिभावावि-
रोधात् नहि द्वारद्वारिणोः फलजनकत्वं येन रूपेण तेन रूपेण
तयो हेतुहेतुमद्भावेपि नियमो मानाभावात् इत्यभिधानसंयोगपद

ज्ञानपदार्थोपस्थित्यादिषु अव्यवधानादिकारणत्वाभावेतु व्यभिचाराच्च नचैवं धारावाहिकस्थले पूर्वपूर्वेषां विशेषणज्ञानानामुत्तरोत्तरलिङ्गपरामर्शप्रत्यक्षं प्रति करणत्वापत्तिः यं जनयित्वैव यस्य जनकत्वं तस्यैव तत्र व्यापारत्वात्। यत्तु तथानियमेऽपि न क्षतिर्लिङ्गस्य ते-रपि व्याप्तिविशिष्टज्ञानतया विशेषणव्याप्तिविषयकेण पूर्वानुभवेन संस्कारेण वा ज्ञानताव्याप्तिविषयत्वेनैव करणत्वादिति तन्न जन्यत्व विशेषितेन संशयसाधारणेन व्याप्तिविशिष्टज्ञानत्वेन तज्जन्यत्वात् निश्चय साधारणेन च व्याप्तिविशिष्टवैशिष्ट्यावगाहिपक्षनिश्चयत्वेनानुमिति हेतुत्वात् यदि च विशिष्टव्याप्तेः प्रथममनुपस्थितावपि विशेष्ये विशेषणं तथापि विशेषणमिति रीत्या परामर्शादनुमितिस्तदा नियतपूर्वोपस्थितिकपदार्थोपस्थितेरेव कारणत्वं वाच्यम्। यत्तु परामर्शजनकत्वेन तत्तद्विशेषणज्ञानानां कारणत्वमिति तन्न अन्यम्प्रति पूर्ववर्त्तित्वं ग्रहीत्वैव तथात्वग्रहेणान्यथासिद्धत्वात् नच तत्र पञ्चकगुरुत्वमन्यं प्रतीति वाच्यं गौरवात् नचैवं भ्रमिजनकत्वदशायां दृढत्वमपि दण्डे घटजनकतावच्छेदकं न स्यादिष्टत्वात् दण्डत्वेनैव तथात्वात् क्वचिद्घटानुत्पादो भ्रमिरूपव्यापारविरहात् कुण्डचक्रभ्रमिजननसमर्थान्यदाच्चक्रासमवहिता दण्डाद्घटानुत्पत्तौ तत्प्रयोजकतया आवश्यकत्वात् भ्रमिविशिष्टत्वेन च जनकत्वे चक्रादीनामपि पृथक्कारणत्वं न स्यात्तस्याश्च घटार्थितया दण्डे निष्कम्पा प्रवृत्तिः प्रथमं भ्रमेरुपधानानिर्णयात् अस्तु वा भ्रमि प्रयोजकोऽवयवसंयोगविशेषादिरेव तथा। प्रथमोपस्थितत्वादावश्यकत्वाच्च अन्यथा घटजनकत्वेनैव भ्रमिजनकतां किमिति न दोषयोः। घटस्य सौवर्णवैणवादिदण्डेष्वनुगतदण्डत्वविरहेऽपि न क्षतिः। किञ्चैवं प्रवृत्तिं प्रतीष्टसाधनताज्ञानजनकत्वेन शब्दादीनां शाब्दबोधं प्रति च तज्जनकाकाङ्क्षादिज्ञानजनकत्वेनानुमानसंस्कारतत्तद्विशेषणज्ञानादीनां कार्यान्तरं प्रति च तज्जनकतत्तत्पदार्थकारणानां तत्तत्पदार्थकारणत्वेन हेतुत्वप्रसङ्गः तज्जनकत्वेन हेतुत्वे तत्त्वेनैव हेतुत्वं प्रथ-

नोपस्थितत्वादवच्छेदकत्वाभावादिति चेत् किमिदं प्रकृते ? प्रागुपस्थि-
ष्ठितम् इदं पुनरिच्छाविषये विशिष्टविषयकत्वेन कारणत्वे केवलविशे-
ष्यादिविषयत्वेन न हेतुत्वं तदवच्छिन्नकार्य्यजनकतावच्छेदकान्तरा-
व्यापकरूपेणैव तदवच्छिन्नं प्रति जनकत्वात् दर्शयिष्यते हि तथान्यथा
सिद्धत्वमन्यथा घटत्वाद्यवच्छिन्नं प्रति कपालतत्संयोगादीनां जन्यत्ववि-
शेषितेन गुणेन वा भव्यत्वगुणत्वादिना विशिष्टवैशिष्ट्यबोधं प्रति च
विशेषणतावच्छेदकविषयत्वेन हेतुत्वप्रसङ्गात् अनुमितिशाब्दबोध-
चिकीर्षादिकं प्रति च परामर्शाकाङ्क्षाकृतिसाध्यत्वादिज्ञानविषय
विशिष्टाविशिष्टतत्तत्पदार्थविषयत्वेन हेतुत्वे अनन्तकार्य्यकारणभाव
प्रसङ्गाच्च नचाव कारणान्तरासम्भवादगत्या परामर्शजनकज्ञानस्य तथा-
त्वं कल्प्यते चिकीर्षां प्रत्यपि कृतिसाध्यताज्ञानजनकज्ञानस्य तथात्वा-
पत्तेः तत्र मन एव कारणमिति चेत् तत्रापि तदेवास्तु मनोऽसाधारण
कारणकज्ञानत्वेन मानसत्वापत्तिरिति चेच्चिकीर्षादिसाधारणतत्कारण-
कत्वस्यैव ज्ञानत्वविशेषितस्यापि तथाप्रयोजकत्वात् किं तर्हि मान-
सत्वे प्रयोजकमिति चेत् किन्नाम प्रयोजकं कारणत्वेन किञ्चित् कार्य्य-
त्वेनोत्पत्त्युक्तं व्यापकत्वेनाप्रमेयत्वादि व्याप्यत्वेन तत्सामग्रीजन्यत्वादि तद-
वच्छिन्नोत्पत्तिनियामकत्वेन तत्सामग्री कारणाभेदे कथं कार्य्यवैजात्य-
मिति चेत् सामग्रीवैलक्षण्यात् यथा मनःकारणकानामेव चिकीर्षा-
सुखादीनां यथा वा भिन्नकारणकानां पाकजानां कथं तर्हि प्रमाणविभाग
इति चेत् कारणविशेषकक्रियावैजात्यविशेषादिति विभाव्यताम् । अपरे
तु व्याप्तिज्ञानत्वेन विशिष्टपरामर्शत्वेन वा नानुमितिमात्रं प्रति
हेतुता साध्यादिभेदेन व्याप्तेर्भेदात् किन्तु पक्षज्ञानत्वेनाभावज्ञानत्वेन
ज्ञानत्वेन वा पक्षोऽपि धर्म्मिमात्रं पक्षताया अप्यननुगमात् तत्तत्पक्ष-
तावच्छेदकविशिष्टवह्न्यनुमितिं प्रति तत्तद्विशिष्टे वह्निव्याप्यवत्तापरा-
मर्शत्वेन हेतुताया आवश्यकत्वे वह्न्यनुमितिमात्रं प्रत्यपि न तादृश-
परामर्शत्वेन हेतुता गौरवात् किन्तु वह्निव्याप्तिज्ञानत्वेन लाघवात्

वस्तुतो वह्निज्ञानत्वेनैव तथा अतिलाघवात् एवं वह्न्यभाववानुमितिं प्रत्यपि एतेनानुमित्यन्तरं व्याख्यातमिति वदन्ति । उक्तं पक्षवितेनेति ।

केवलान्वयीत्यादि केवलान्वयिसाध्यकादीत्यर्थः । तत्र तेषु मध्ये अक्लिष्टपक्षम् अत्यन्ताभावाप्रतियोगिसाध्यकं केवलान्वयि एवमगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकि गृहीतान्वयव्यतिरेकिसाध्यकमन्वयव्यतिरेकि व्याप्तिग्राहकसहचारभेदाद्भेदे त्वन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वं तच्च प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वं तादृशसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वकत्वं वा गृहीतव्याप्तिभेदाद्भेदे तु प्रकृतहेतुकप्रकृतसाध्यानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यव्याप्तित्वकत्वं तत्त्वम् अतो निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादौ हेतुतावच्छेदिका च व्याप्तिर्न प्रकृतसाध्यानुमित्यौपयिकी तद्विशिष्टपक्षधर्मताज्ञानेपि व्याप्त्यन्तरबोधं विना निर्गन्धत्वानुमित्यनुदयादिति नाव्याप्तिः वह्न्यभाववान् वह्निव्यापकाभावप्रतियोगिमत्त्वादित्यादावन्वयव्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिर्न तु सैवेति नातिप्रसङ्गः अतएवेतरव्यापकाभावप्रतियोगित्वेनाभावप्रतियोगित्वेन वा यल्लिङ्गज्ञानं न प्रकृतसाध्यानुमितिहेतु तत्केवलान्वयीत्यपि वदन्ति एवं केवलव्यतिरेकित्वादिकमपि निर्वाच्यम् । अभिधेयत्वं शब्दशक्यत्वं विपक्षत्वव्याघातो विपक्षस्यासिद्धिः । ननु व्याप्यत्वमन्योन्याभावप्रतियोगितावच्छेदकत्वं तच्च लघुगुरुसाधारणं गगनादिनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वेति न व्यभिचार इत्यत आह एवमिति । नन्वभावप्रतियोगित्वादिकमभावादिव्यक्तिभेदान्नानैव अनुगतव्यवहारस्तु कथञ्चिद्विशेषणतावच्छेदकधर्मानुगमादेवेत्य चाप्याप्रसिद्ध्या सद्धेत्वसम्भव इत्याशङ्कते तन्नेत्यादि । यत्र त्वीत्याद्यभ्युपगमवादः वस्तुतो भूतलादिदेशे सम्बन्धे च तस्य वर्तमानत्वादात्माभावतुल्यत्वाच्च । अभावाभावस्येति सावधारणं भावत्वात् यदाहुराचार्याः स्वाभावविरहात्मत्वं

वस्तुनः प्रतियोगितेति प्रतियोग्येवेति प्रागभावादेरत्यन्ताभावाभाव-
रूपत्वनयेऽपि न क्षतिः तन्मतेऽत्यन्ताभावस्यापि तदभावरूपतया
तस्यापि प्रतियोगित्वात् । असाधारणइति प्रतियोगितावच्छेदकइति
तु तत्त्वम् अथान्योन्याभावात्यन्ताभावसाधारणः प्रतियोगितावच्छेदक
सम्बन्धएवाभावाभावः क्व कालिकादावस्तु क्वचिच्च संयोगादिरिति
चेत् यदन्वये हि ज्ञाते यदस्त्वं न प्रतीयते तदभावत्वस्यैव व्यवच्छिद्यते
तस्यैव तदभावात्मकत्वमनुमीयते प्रतियोगितदभाववत्त्वबुद्धेश्च मिथ-
स्तथात्वमनुभवसिद्धं नच तत्सम्बन्धवत्त्वस्य तद्विषयः सम्बन्धसम्बन्धवत्त्वा
बुद्धिवत् कालिकसम्बन्धबुद्धिर्विशेषदर्शनतो न प्रत्युच्यते नच स्वतोमानाभा-
वात् अथ सम्बन्धान्तरावच्छिन्नाभाववति सम्बन्धान्तरेण प्रतियोगिनो
वृत्तौ न तदभावविरोधित्वमिति चेत् प्रतियोगितावच्छेदकसम्बन्धस्या-
भाववति सम्बन्धान्तरेण वृत्तौ न तथात्वम् सम्बन्धविशेषेण च विरो-
धित्वं तुल्यमेव अनतिप्रसङ्गाय च स्वप्रतियोगितावच्छेदकासम्बन्धत्वेना-
भावत्वकल्पने लाघवमसम्भावनापीति व्यधिकरणसम्बन्धस्यापि प्रतियो-
गितावच्छेदकत्वाच्च तदत्यन्ताभावविलयप्रसङ्गो भवतां तदभावविलोप-
प्रसङ्गो वेति । लाघवमपरिष्कुरुते वृत्तिमदित्यादि आकाशस्य तद-
भावाभावत्वमित्यभ्युपगमनाञ्च भावत्वमिति तदभावासत्त्वप्रतीत्या हि
भावस्य तदभावाभावत्वं कल्प्यते न चेह तथा अभावप्रतियोगित्वं
स्वरूपसम्बन्ध एवेत्युक्तप्रायत्वात् अभावप्रतियोगित्वस्याप्रयोजकम् एवञ्च
यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वं यस्य तस्य तेन सम्ब-
न्धेन केवलान्वयित्वमिति सूचयितुं वृत्तिमदिति अतएव ज्ञानस्य ज्ञान-
त्वस्य च समवायेन ज्ञानविषयत्वादेश्च व्यधिकरणसमवायादिना सम्ब-
न्धेनाभावप्रतियोगित्वेऽपि विषयतया परम्परासम्बन्धेन स्वरूपसम्बन्धेन
च केवलान्वयित्वं संयोगाद्यभावोपसंग्रहाय च प्रतियोग्यसमानाधि-
करणत्वेनाभावो विशेष्यः आकाशाभावोऽपि च यथा प्रतियोग्यसमा-

नाधिकरणत्वयोः सम्बन्धत्वात् वृत्तिमतस्तादृशाभावाप्रतियोगित्वमिति वार्थः व्याप्यवृत्तित्वार्थकं वृत्तिमत्पदमभावविशेषणमित्यपि कश्चित् तादृशोऽनभिधेयस्य केवलान्वयित्वसम्पत्तये व्याप्तिवद्दलसमालोचनीयम्। प्रमाजातीयेति तथा च तादृशाभावप्रतियोगितानवच्छेदक धर्म्मवत्त्वमर्थः इत्यत्र प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्य मेवाभावविशेषणं तेन द्रव्यगुणभेदयोर्द्वित्वादिना न केवलान्वयित्वम्। न चैवं विरुद्धयोर्धर्म्मयोर्द्वित्वेन केवलान्वयित्वापत्तिः तदवच्छिन्नाधिकरणाप्रसिद्ध्या तदवच्छिन्नाभावे प्रतियोगिसामानाधिकरण्यस्यासम्भवादिति वाच्यं तादृशधर्म्मावच्छिन्नस्य यत्किञ्चिदधिकरणवृत्तिताया विवक्षितत्वात् क्वचिदपि तादृशोभयवत्त्वाप्रतीतेस्तस्याऽतथात्वात्। सन्दिग्धसाध्यवत्त्वं पक्षत्वमित्याशयेनाह तथापीति कस्यचित् साध्यस्य घटवृत्तित्वसाध्यस्य साध्यसिद्धिविरोधी साध्यसिद्धिनिवर्त्यः विशेषणविशेष्यभावभेदेऽपि विरोधिविषयतामात्रेण प्रतिबन्धकत्वमनुभवबलादाश्रीयते नन्विदं साध्यवच्च वा साध्यभिन्नेतरनिश्चयेऽप्य साध्यं न वा इदं साध्यवन्न वेति कथन्तरः सन्देह इति। पक्षनिष्ठेत्यादि पक्षनिष्ठाभावप्रतियोगित्वज्ञानविरोधिज्ञानस्य साध्यसाधकत्वेन कथञ्चित् साध्यसिद्ध्यनुगुणत्वेन पक्षनिष्ठाभावप्रतियोगित्वज्ञानाभावस्य वा साध्यस्य साधकत्वेन तदभावस्य तस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वज्ञानस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वावगाहिज्ञानत्वेन साध्यसिद्धिप्रत्यक्षज्ञानविरोधित्वेन वा स्वीयाभावस्य योग्यतात्वात्। व्यतिरेकः विपक्षे हेतोरभावः व्यतिरेकव्याप्तौ साध्याभावहेत्वभावयो र्यौ व्यतिरेकौ साध्यहेतू तयोर्व्याप्तौ। अत्र वदन्ति साध्याभाववद्वृत्तित्वमेव व्याप्तिः लाघवात् प्रायशः साधनभेदेऽप्यभेदाच्च यत्सम्बन्धावच्छिन्नसाध्याभाववति हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन साध्यसिद्धिः फलं साध्याभाववति येन सम्बन्धेन हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन पक्षधर्म्म साधीः कारणमिति नातिप्रसङ्गः आकाशादेस्तथात्वेऽपि पक्षधर्म्मता

ज्ञानविरहेऽप्यनुमितेः निर्विघ्नतया वा तत्र साध्यसामानाधिकरण्य
वृत्तिमत्त्वं वा अथ साध्याभाववदवृत्तित्वं तद्वृत्तिभिन्नत्वादिरूपं
व्यभिचारज्ञानविरोधिज्ञानविषयत्वेनानुगमनीयं तच्च व्यापकसामा-
नाधिकरण्यसाधारणमिति चेत् स्यादेवं यदि व्यापकताज्ञानं व्यभि-
चारबुद्धिं विरुन्ध्यात् नचैवं वह्न्यभाववद्वृत्तिर्धूम इति ज्ञाने हि वह्नि
त्वं स्वरूपेण प्रतियोगित्वं तदवच्छेदकत्वस्य सम्बन्धमर्यादया भासते
धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यत्र च
वह्नित्वत्वेन वह्नित्वे प्रतियोगितात्वविशिष्टतदवच्छेदकत्वविशिष्टा-
भाव इति विषयविरोधविरहात् विशिष्टस्य वह्नित्वस्यावच्छेदकत्वेन
प्रकारान्तरानुसरणे च सुतरां सगिमन्यादिन्यायेन च प्रतिबन्धक-
तायां मानाभावात् व्यापकताज्ञानादेवानुमितिरिति च नानुभविकं
न वा यौक्तिकं ज्ञानत्वत्वादिना ज्ञानत्वादेर्व्यापकतावच्छेदकत्वग्रहे
ज्ञानादिमानित्यनुमितेरयोगात् अन्यथा जातित्वेनानुभवत्वव्यापकगुण
त्वव्याप्यजातित्वादिना वा तथात्वग्रहेऽपि तत्प्रसङ्गात् एतेन केवलान्व-
यिसाध्यकत्वज्ञानमेवानुमितिहेतुरित्यपि परास्तम् । सर्वजनानुभव
सिद्धानुमितिभावे धूमादिदर्शनानन्तरं जायमाने व्यक्त्यभावव्यतिरेक-
वह्न्यादिज्ञानेऽसम्भवाच्च प्रमेयत्वादेश्च घटादिवृत्तित्वं केवलान्वयि-
त्वेन कथञ्चित्तद्वृत्तिधर्मव्यापकत्वेन वानुमेयं ननु ज्ञेयत्वादिहेतुका
तदनुमितिरानुभविकी एवं साध्याभावव्यापकाभावप्रतियोगित्वमपि
नानुमित्यौपयिकं गौरवात् व्यभिचारज्ञानाविरोधित्वाच्च वह्न्यभाव
समानाधिकरणाभावाप्रतियोगी धूमाभाववानिति ज्ञानं धूमाभावाभाव
त्वेन तत्र वह्न्यभावसामानाधिकरण्यबुद्धिं कदाचिद्विरुन्ध्यात् ननु
धूमत्वेन भिन्नप्रकारकत्वात् व्यतिरेकव्याप्तिग्रहाधीना च सैवानु-
मितिः कारणेनाननुभवात् तत्प्रकारकत्वाभावात् सामग्रीभेदकल्पनाया-
श्चानुभवैकाधीनत्वात् किन्तु विजातीयतत्कारणमपि प्रमाणान्तरे यथा
पत्तिरेव कृतप्रत्यक्षादयसमाहारसमग्रीका युगपदन्वयव्यतिरेकिरूपं

हेतुप्रतिसन्धानम् अथ निर्वह्नीति विना सिद्धीच्छामर्थापत्ते रनुत्पादात्
पक्षताजन्यत्वात् साध्यनुमितित्वावच्छेदेन पक्षताजन्यत्वस्यैवानुमितित्वे
प्रयोजकत्वात्। नचैवं पक्षताप्रयुक्तस्यापि तथात्वापत्तिरिच्छासत्त्वेपि
कालान्तरे प्रदेशान्तरे वा तदितरत्वस्य सत्त्वेनैककालीनत्वाद्यतीन्द्रिय
घटितप्रतियोगित्वेन तस्याप्यतीन्द्रियत्वादिति चेन्न अनुमिताविव पक्ष
ताया हेतुत्वस्य निरस्तत्वात् साध्यादिभेदेनाननुगतत्वात् तज्जन्यत्वस्या
प्रयोजकत्वाच्च प्रयोजकत्वस्य च जनकत्वासम्भवात् न साध्यत्वं नाना
भावादित्यादेरत्यन्ताभेदितत्वाच्च एतेन व्याप्तिज्ञानादिजन्यत्वमनुमि-
तित्वे प्रयोजकमित्यपि परास्तम्। साध्याभावव्यापकाभावप्रतियोगि
त्वस्यैव साध्यव्याप्यत्वानुमानात् प्रसिद्धसाध्यकैवानुमितिरित्यपि
केचित्। अथ वह्न्याद्यभाववति धूमादेः समवायेन तन्त्वाद्यभाववति
च घटादेः संयोगेन वर्त्तमानत्वात् साध्याभाववति संयोगेन समवा-
यादिना वर्त्तमानत्वस्य विशिष्यैवाभावो वाच्यः तथाच अयं जातिमान्
गुणवत्त्वात् गुणत्वं घटादेरित्यादिकं विलीनेत जातिगुणाभाववता
समवेतत्वसंयोगित्वयोरप्रसिद्धेरिति चेदुपदर्शयेनापि केवलान्वयिनः
सत्वं स्वीकृत्य वा स्वाधिकरणावृत्तिसाध्याभावादिकत्वमेव व्याप्तिं स
त्त्वाननुगमस्य प्रागेव समुक्तितत्वादिति एतेन नीलेतरत्ववान् नीला
समवेतत्वे सति गोत्वादित्यादिकं विलीयेत विशेष्यस्य व्यभिचारित्वात्
विशिष्टस्य चानतिरिक्तत्वादिति परास्तं साध्याभावस्य विशिष्टहेत्व-
धिकरणावृत्तित्वात् परम्परासम्बन्धेन विशेषणविशेष्यसम्बन्धस्यैव वा
तत्र हेतुत्वादिति। व्याप्तिग्रह इति साक्षात्कारित्वैः तत्र केवलान्वयि
न्यभावाच्च साध्यव्याप्यत्वं तदन्यावृत्तित्वादिरूपमन्यतः साध्यमेव
प्रसिद्धम्। निश्चयाधीति उपाधिज्ञानाहितव्यभिचारनिरासाय पृथि-
वीत्वमिति पृथिवीत्वमितरभेदव्याप्यमित्यत्र हि पृथिवीत्वविशिष्टे
पृथिवीत्वे इतरभेदसामानाधिकरण्यं भासते पृथिवीतरभिन्नेत्यत्र
तु पृथिवीत्वविशिष्टे तदवच्छेदेनेतरभेद इति न सिद्धसाधनमित्यर्थः

सर्व्वैति च पृथिवीत्वस्यावच्छेदकत्वस्योपपादनाय अत्र च पृथिवीत्वत्वं पृथिवीतरासमवेतत्वमात्रं न तु पृथिवीवृत्तित्वघटितमित्यतोऽपि नोपनयवैयर्थ्यम्। अथान्वयव्याप्तिघटकतावत्पदार्थोपस्थित्यादिकं विना न तद्ग्रहसम्भवस्तत्सत्त्वे च तत एव व्याप्तिग्रहसम्भवे व्यतिरेकसहचारज्ञानस्य हेतुत्वे मानाभावः नच व्यभिचारशङ्कानिवर्त्तकत्वेनैवान्वयव्यतिरेकसहचारग्रहयोरुपयोगित्वं तद्ग्रहेऽपि शङ्कासादवस्थ्यात् अधिकरणविशेषे च तन्निवृत्तेः। साध्यवत्त्वसाधनाभाववत्त्वयोरन्यतरग्रहस्यैव तत्त्वात् व्यतिरेकव्याप्त्युपन्यासेऽर्थान्तरादितादवस्थ्याच्च। यत्तु सहचारमात्रस्याभावेऽपि सर्व्वोदाहरणोपन्यासइति तन्न अर्थान्तराद्यापत्तेर्दुर्व्वारत्वात् यत्कृत्यादिवैयर्थ्याच्च व्युत्पादयिष्यते च तस्य व्याप्तिबोधकत्वम्। नचान्वयिन इव व्यतिरेकिणोऽप्युदाहरणात् स्वरसिद्धान्वयव्याप्तिधीरानुभविकी येन तदर्थमपि प्रकारान्तरमास्थेयमत आह यद्वेति। साध्याभावेति नन्वेवमादौ साध्ये आत्मत्वादेर्व्यतिरेकित्वं न स्यात् स्याच्च संयोगादेरात्मत्वे तथात्वमिति चेन्न। साध्यतावच्छेदकावच्छिन्नसाध्यासमानाधिकरणत्वेन साध्याभावस्य साधनतावच्छेदकावच्छिन्नसाधनासमानाधिकरणत्वेन च साधनाभावस्य विशेषितत्वात् संयोगाभावे साध्ये विभागाभावः केवलान्वयी प्रतियोगिवैयधिकरण्यावच्छिन्ने च तत्र स तादृशो व्यतिरेक्यपि व्याप्यव्यापकभावस्य साध्याभावत्वसाधनाभावत्वाभ्यां बोध्यत्वेन न व्यभिचारादिप्रसङ्गः साध्याभावत्वादिकञ्च वैज्ञानिकं नतु वास्तवं तेन मेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिभ्रमादनुमानम्। व्यापकीयत्वेनाभावस्य ज्ञानाद्व्याप्यीयत्वेनाभावस्य सिद्धिं पुनरप्रसिद्धसाध्यकसाधारणीनाञ्च व्यापकाभावेनेत्यादि अभावो अभाववत्त्वनिश्चयो अवश्यम्भावश्चानति प्रतिबन्धकेऽत्र च यद्रूपावच्छिन्नं प्रति व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेनाभावसिद्धिः फलम् येन रूपेण व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेन व्यापकत्वविशिष्टतद्रूपावच्छिन्नीयत्वेन चाभाववत्त्वाज्ञाने हेतुरिति

सन्तयं व्याप्यत्वप्रतियोगिकव्याभावस्यातिप्रसक्तत्वात् व्यापकत्वावच्छिन्नप्रतियोगिताकस्य च सम्बन्धविशेषावच्छिन्नस्य सम्भवतोऽप्रसार्वत्रिकत्वात् कारणानुगमः परस्परविचिन्तनीयः एवञ्च वह्निर्धूमव्यापको वह्न्यभाववन्निष्ठात्यन्ताभावप्रतियोगिज्ञानाद्धूमव्यापकवह्न्यभाववत्तानवच्छिन्नज्ञानाद्वा निर्धूमोऽयमितिधीरिति धूमव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववानयमितिज्ञानादित्यपि कश्चित्। व्याप्तिज्ञानस्येति अत्र व्याप्तिपदे नान्वयव्यतिरेकव्यापकताघटकनियतविषयताकोऽर्थोऽभिमतः पक्षस्य पक्षतावच्छेदकस्य वा ज्ञानमनुमितिमात्रे हेतुरित्यपि वदन्ति। अन्वयीति अन्वयिनि ताद्रूप्येण वह्नित्वादिना व्यतिरेकिणि तु स्वप्रतियोगित्वेन वह्न्यभावादिनिषेधतया सिद्धिरित्यनुभवसिद्धः कार्य्यगतो विशेषः कारणविशेषजन्यतावच्छेदको अतएव तत्र तत्र सर्व्वत्र व्यतिरेकिणि तत्रापि तथैव निगमनपरीक्षम् अन्वयिना वह्न्यभावेन धूमाभावसिद्धौ धूमाभावत्वं प्रकारः व्यतिरेकिणि तु तत्सिद्धौ प्रत्यक्ष इव प्रतियोगितया धूमः प्रकार इति वदन्ति इत्थञ्च ह्रदो धूमाभाववान्न वा पर्व्वतो वह्निमान् न वेत्यादिजिज्ञासायां विप्रतिपत्त्युद्देश्यया साध्यतावच्छेदकरूपेण साध्यवत्त्वप्रतीतेरनुपयोगिनो व्यतिरेकमुद्राश्रयादेः कथमवतार इति विभावनीयम्। केचित्तु अन्वयव्याप्तिज्ञानानन्तरत्वादिकमेवानन्यप्रतियोगिकतया अन्वयतावच्छेदकमित्याहुः। अन्यातरत्वेन ताद्रूप्यप्रकारकत्वयोः कारणत्वमित्यपि कश्चित्।

उचितानुपूर्व्वीकं प्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वं प्रतिज्ञात्वादिकं पुनरुदासीनवाक्यवारकान्यायान्तर्गतत्वशून्यमेवोपादेयमिति नान्योन्याश्रयः साध्यादिविशेषनियन्त्रितास्तु प्रतिज्ञादयो वाच्या इति न भिन्नसाध्यादिकप्रतिज्ञादिसमुदायेऽतिव्याप्तिः व्याप्त्यादेरिव साध्याद्यननुगमादननुगमो न्यायादेरपीष्यत एव एतेन प्रतिज्ञानिगमनयोरपुनरर्थावयवान्तरयोश्च न सम्भूयैकार्थप्रतिपादकत्वं प्रागेव तु पञ्चानामवयवानां परन्तु प्रतिज्ञाहेत्वोः कथञ्चिदुपनयनिगमनयोरेकवाक्यता

व्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरत्वमात्रेण तादृशपरामर्शप्रयो-
जकत्वञ्च यदि तद्विषयतत्तदर्थस्योपस्थापकतया तदोदाहरणोपनय
योरेव तत्पर्य्यवस्यति अथ तदनुकूलत्वमात्रेण तदा को वह्निमान् पर्व्वतो
वह्निमान् कुतो धूमवत्त्वादित्यादेरपि तथात्वमित्यादिकं समाहितम्।
अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञाद्यघटकत्वे
सति उभयघटकभागुदयाघटितत्वं वा वक्तव्यम् उभयञ्च प्रतिज्ञाहेतू
हेतूदाहरणे उदाहरणोपनयावुपनयनिगमने इति विशिष्य वक्तव्यमिति
प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकज्ञानप्रयोजकान्यतमज्ञानजनक
वाक्यत्वं तत्त्वमित्यपि केचित्। तथैवेति तथाच तादृशज्ञाने साधका
भाव इति भावः। बाधकमप्याह अन्यथेति न्यायजन्यज्ञाने पञ्चावयव
जन्यत्वात् पञ्चत्वादिजन्ये द्वित्वाद्या एकैकजन्ये चैकैकजातय इति
सङ्कर इत्यर्थः तत्र तत्र भिन्नभिन्नजातिकल्पने सुतरां मानाभावादिति
भावः। केचित्तु यदि जानुगतं कारणमन्तरेणापि तादृशजातिमत्त्व
सम्भवस्तदा कदाचित् प्रतिज्ञादिजन्येऽपि हेत्वादिजन्यवृत्तिर्हेत्वादि-
जन्ये च प्रतिज्ञादिजन्यवृत्तिर्जातिः स्यादिति सङ्कर इत्यर्थः एवं सर्व्वेषां
सर्व्वजातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः। साध्य
निर्द्देशः प्रतिज्ञेति सूत्रम् साध्यो विधेयधर्म्मविशिष्टो धर्म्मी तथा च
पक्षतावच्छेदकपर्व्वतत्वादिविशिष्टे साध्यतावच्छेदकवह्नित्वादिविशिष्ट
वैशिष्ट्यज्ञानजनको न्यायावयव इति पर्य्यवसितोऽर्थः उदाहरणाच्च
साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानं न पक्षतावच्छेदकविशिष्टे उप-
नयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञान
मिति तयोर्व्युदासः। किन्त्वित्यादि प्रकृतन्यायवहिर्भूतवाक्यवारणाय
सत्यन्तं प्रकृतन्यायावयवत्वपर्य्यवसितार्थकम्। उद्देश्येति प्रकृतेत्यर्थः
वह्निसाध्यकन्यायोपनयस्य वह्निव्याप्यधूमसाध्यकानुमित्यन्यूनानति-
रिक्तविषयकज्ञानजनकस्य वारणाय प्रकृतेऽयं तथाच यादृशसाध्य
पक्षकन्यायावयवत्वं तादृशसाध्यपक्षकानुमित्यन्यूनानतिरिक्तविषयक

साध्यज्ञानजनकत्व पर्य्यवसितार्थः। धूमादालोकवान् पर्व्वतो वह्निमान्
धूमादित्यादावनतिरिक्तविषयकज्ञानजनकस्य हेतोर्व्वारणाय अनूनेति
निगमनवारणाय अनतिरिक्तेति यद्यपि निगमने साक्षात्पक्षवाचकं
पदं न श्रूयते तथापि अनुमताभङ्गायोपनयस्थाचलादिपदस्यानुषङ्गा-
त्तथा बोध्यम् इत्यमेव च प्रसक्तामतिप्रसक्तिं निगमनस्येत्यादिना
निराकरिष्यति तदर्थं च निगमनस्यानूनानतिरिक्तविषयकज्ञानजनकं-
सत्र पञ्चासम्बद्धहेतु र्येन निराकाङ्क्षवाक्यत्वलक्षणं प्रतिज्ञात्वं तदपि
व्याप्तत्वात् अबाधितत्वादेरनुद्बोधोपयिकविशिष्टहेतुसम्बन्धस्य वा बो-
धकतया तदनतिरिक्तविषयकज्ञानजनकत्वादिति। यत्तु पृथिवी
इतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ यत्र पृथिवीतरेभ्यो भिद्यते न
तत् पृथिवीत्युदाहरणवारणाय तदिति तत्तुच्छम् तेन पृथिव्यामितर
भेदस्यानिरूपणात् तात्पर्य्यक्रमेण तादृशबोधजनकत्वस्यातिप्रसक्त-
त्वात् न च तावताप्युदाहरणस्य तथात्वसम्भवो यत्रेत्यादेरनन्वयात्
यदि च निगमनेनाप्ययमादिपदं निविशते वाक्यैकवाक्यतयैव विशिष्ट
ज्ञानादिति विभाव्यते तदा हेतौ साध्यसामानाधिकरण्यभाने सामा-
न्यतः पक्षेऽपि साध्यवत्त्वभानात् पक्षे हेतुव्यापकसाध्यसामानाधि-
करण्यविशिष्टहेतुसत्ताबोधकस्योपनयस्य यत्र च पक्षसाध्ययोरनु-
क्तेः दृष्टान्तत्वहेतुत्वाभ्यामुपन्यास तादृशसिषाधयिषया च न्याय-
प्रयोग स्तत्रोदाहरणोपनययो र्यत्र वा पर्व्वतत्वावच्छेदेन साध्यसिद्धे
रुद्देश्यतया पर्व्वतत्वादिना दृष्टान्तस्योपन्यास स्तत्रोदाहरणस्य
चान्यस्य चावयवाघटकन्यायान्तर्गतत्वपरतया हेत्वन्तस्यायमादि-
निगमनान्तभागस्य वारणाय तत् यद्यपि सर्व्वमभिधेयं प्रमेयमित्या-
दावतिरिक्ताप्रसिद्धि र्न च कोऽप्यप्रसिद्ध्या प्रमेयं न वेति विप्रतिपत्तेः
संशयस्य चायोगात्र तादृशी प्रतिज्ञा प्रकृतानुमितिविषयतासमव्याप्त
विषयताकत्वं प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा वक्तव्य
मिति वाच्यम् सकलाभिधेयवृत्तिधर्मवत्त्वरूपाभिधेयनिष्ठात्यन्ता-

भावप्रतियोग्याकाशाभाववदा इदं द्रव्यमित्यादौ विशिष्टपक्षबोधके उपनयेऽतिव्याप्तेः तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयत्वं तदन्यूनविषयत्वं प्रकृतपक्षम्यर्थपक्षकप्रतिज्ञादिस्थले तु पक्षे प्रकृत्यर्थस्य वैशिष्ट्यबोधकोद्देतुर्न तु प्रकृतसाध्यस्य तादृशविषयतावित्वच्छन्नविषयतान्यूनत्वं प्रकृतहेतुकप्रकृतसाध्यसिद्धेरापयिकव्याप्तविषयत्वं वा तदनतिरिक्तविषयत्वं वह्निव्याप्यालोकवत्त्वधर्मा पर्व्वतो वह्निमान् धूमादित्यनव्याप्यधूमवान् पर्व्वतोवह्निमान् धूमादित्यादौ तस्याः संग्रहाय प्रकृतहेतुसाध्ययोरुपादानं वह्निव्याप्यधूमवान् पर्व्वतो वह्निमान् धूमात् सत्तादिव्याप्यद्रव्यत्ववदिदं सत्तादिमद्द्रव्यत्वादित्यादिस्तु न प्रयोगः विशिष्टपक्षोपस्थापकादेव तादृशव्याप्तिप्रतीतावाकाङ्क्षाविरहेणोदाहरणानुत्थानात् अन्यथातिप्रसङ्गात् अतएव गैकदोभयव्यानुपन्यासोपि यदिच्च सेभः पश्यति अयं गौरित्यादेरेव प्रतिज्ञायाः यथोपवर्णितविशिष्टज्ञानजनकत्वं तादात्म्येन गोः साध्यत्वात् गोत्वाद्यनुपस्थित्या गोत्वादेः साध्यत्वानुपपत्तेः पदार्थतावच्छेदकजातौ हेत्वर्थान्वयायोगाच्च वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वह्नेः संयोगात्मकः सम्बन्धो भासते यथैव वह्निव्याप्यधूमवानित्याद्युपनयसङ्गमात् शाब्दभाने तु वह्निमतोऽभेदः एवं भेदे साध्ये भिद्यते भिन्नमित्यादावपि वैलक्षण्यमिति सूक्ष्मसीयते तदा तादृशपक्षसाधिकाः पक्षे यादृशयादृशविशिष्टार्थबोधिकाः प्रतिज्ञाः सम्प्रदायप्रसिद्धाः तादृशानां बोधकानामन्यतमेनाप्यनिवर्त्यस्य संग्रहस्याभिलषितोयस्तावद्बोधानामन्यतमबोध जनकत्वं लक्षणम् एवञ्च तादात्म्येन अपि साध्ये पक्षे गवाभेदस्य संयोगेन समवायेन वा वह्नौ वह्निमदभेदस्य समवायेन पाकस्य कृतौ पाकप्रतिभावस्य पाककर्तृभेदस्य विशेषणतयेतरेभ्यो भेदे इतरभेदवत्त्वव त्वस्येतरान्याभेदस्येतरभेदवत्त्वस्य तरभिन्नाभेदस्य च बोधा विशिष्य वक्तव्या इति दिक् तादृशबोधा

निवर्त्त्यसंशयानिवर्त्तकं तावद्बोधनिवर्त्त्यं तावत्संशयनिवर्त्तकबोधजनकत्वं वाच्यमित्यपि कश्चित् । चैत्रः पचति घटोऽनित्य इति प्रतिज्ञायां साध्ये विधेयत्वानुयोगित्वयोः सम्बन्धविधयैवान्वयबोधाद्यथोपदर्शितसाध्यासक्तवैशिष्ट्यकव्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे उपनेयत्वात् तथा चायमित्याकारः सकलस्य प्राचामुपनयः नव्यानां पुनरनन्यगतिकतया तद्व्याप्यहेतुमांश्चायम् वेत्याकारः योग्यतावशाच्च तदा साध्यस्य तद्व्याप्यस्य च परामर्शः । केचित्तु वह्निमानयमिति विप्रतिपत्तौ तदधीन संशये च वह्निमत्तदन्योन्याभावयोरादावप्रविशेषणत्वाभ्यां कोटित्वेन जिज्ञासितत्वात् आदावेव वह्निमानेव साधयितुमुचितो न तु वह्निः अजिज्ञासितत्वात् तथा च तथाचायमित्याकारो वह्निमद्व्याप्यधूमवांश्चायमित्याकारो वा उपनयो न तु वह्निव्याप्यधूमवांश्चायमित्याकारोऽर्थान्तरत्वादिति प्राहुः । यत्र चान्तरा तादृशबोधो न जातस्तत्रापि तादृशाकाङ्क्षायोग्यतादिशालित्वरूपं तज्जननयोग्यत्वमक्षतं तस्माभावस्य जातिविशेषोपस्थापकशब्दवाक्यशब्दयोरपसन्दानादेवेति । अन्यूनेत्यादि तथा चोद्देश्यानुमितिसमानविषयकलिङ्गविषयकशाब्दज्ञानजनकन्यायावयवत्वमर्थः व्यतिरेकिणि ह्रदो निर्धूमत्वादौ निर्वह्नित्वहेतुके यथा ह्रदो भिन्नमित्यादि दृष्टान्तवतो ह्रदावृत्तिधर्मशून्यत्वादिहेतुके वोदाहरणस्य वारणाय समानविषयकत्वं पदविशेष्यकार्थकम् उपनयवारणाय लिङ्गविषयकेति । यद्यपि प्रकृतलिङ्गाविषयत्वं पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् गन्धवती तथा गन्धादित्यादावव्यापकं तथापि नयनासम्भवः इदमागन्धवत्त्वेन पराभृष्टे हेतुभूतगन्धवत्त्वान्वयायोगादिति वाच्यम् साध्याभावव्यापकगन्धाभावाभावत्वेनान्वयात् अतएव व्यतिरेकिणि नच नेयं पृथिवीत्यादिकः प्राचां प्रयोगः यदि च द्रव्यवान् रूपवद्द्रव्यानित्यत्वान्वयो नानुपपन्न स्वादिविशिष्टे गुण तद्विशिष्टान्वयस्यैवाव्युत्पन्नत्वादित्युपेयते तदा नानुपपत्तिरन्योऽपि पक्षा विशेषणत्वेन तदविषयत्वञ्चायं वह्निसामग्रीमान् वह्नेरित्यादौ पक्षा

विधेयत्वेन साध्याविशेषणत्वेन च तदविषयत्वं दधि मधुरं मधुः
प्रमेयत्वमभिधेयं प्रमेयत्वात् गोत्वाभावेन साध्यादिमान् गोत्वाभावा-
दित्यादावव्यापकमतिव्यापकश्चोपनयस्य तथापि पक्षतावच्छेदकविशिष्ट
पक्षे यत्साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वं तद्बुद्धिभावेन
लिङ्गविषयत्वस्याभावो बाध्यः वस्तुतो लिङ्गं लिङ्गत्वं तथाच प्रकृत
हेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतोप-
धिकं यद्व्याप्तिविषयत्वं तच्छून्यत्वमर्थः तच्च हेतौ साध्यव्याप्यतावगा-
हित्वम् हेतुभूताभावप्रतियोगितावच्छेदकावच्छिन्ने साध्याभावव्यापक
तावगाहित्वञ्च द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्म्मवानयं द्रव्यत्ववान् गुणात्
गुणव्याप्यरूपवानयं स्पर्शवान् रूपादित्यादौ प्रतिज्ञासंग्रहायावच्छेदक
द्वयोपादानम् अन्यूनानतिरिक्तपदमिति च न्यूनमुद्देश्यानुमित्यन्यूना
नतिरिक्तविषयभागपरं हेतुत्वमभिधेयं मेयत्वादित्यादौ पञ्चम्यर्थ
पक्षकहेतुवारणाय पञ्चम्यन्तान्यत्वस्य हेत्वन्यत्वस्य वा वाच्यं वाच्यत्वात्
संख्यातिरिक्तसुबर्थस्य प्रातिपदिकार्थे विशेष्यत्वेनैवान्वयात् प्रातिपदि
कार्थयोः क्रियाप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयस्याव्युत्पत्तेर्वच
मानत्वात् चैत्रस्येदं न मैत्रस्य मैत्रस्येदं न चैत्रस्य द्वयोरिदं नेदमेक
स्यामीत्यादौ चैत्रादिसम्बन्धाभावबोधस्य विना विभक्त्यर्थविशेष्यता
मनुपपत्तेः चैत्रो न पचतीत्यादौ तिङर्थस्येव विनाप्यनुयोगिनि सप्तमीं
सुबर्थस्याप्यभावान्वयात् हेतुविषयकज्ञानजनकत्वव्याप्यावयवतावच्छे-
दकरूपशून्यत्वे सत्युदाहरणान्यन्यायावयवत्वं तच्चवत् तादृशावच्छेदकं
हेतुत्वादिकमिति केचित् । हेत्वभिधानेति जिज्ञासाजनकत्वं तद्यो-
ग्यता वाक्यत्वं न्यायावयवत्वम् । लिङ्गेत्यादि लिङ्गविषयेति पूर्वोप
दर्शितार्थकम् अभावहेतुकव्यतिरेक्युदाहरणवारणाय लिङ्गेति लिङ्गं
साध्यं तद्विषयकं तदविशेष्यकं तेनेदं जलं निःस्नेहत्वप्रकारकप्रमा
विषयत्वशून्यत्वात् इदं द्रव्यं जलान्वयप्रकारकप्रमाविषयत्वशून्य-
त्वादित्यादौ यत्र जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्याद्युदाहरणे

नातिप्रसङ्गः । लिङ्गाविषयेत्यस्य पूर्व्वोक्तव्याप्यत्वाविषयार्थकत्वे हेतु
वारणाय लिङ्गेति लिङ्गविषयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्न
हेतुविशिष्टहेतुत्वविषयतावच्छिन्नभावेन बोध्यं तेन वह्निमान् वह्निसा-
मग्रीमत्त्वात् अयं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रतीयमानत्वादित्यादौ
हेतौ नातिप्रसङ्गः लिङ्गविषयकज्ञानजनकत्वानियतलिङ्गविषयक
ज्ञानजनकत्वनियतावयवत्वावच्छेदकरूपवत्त्वं तत्त्वमित्यादिकं तादृशाव
च्छेदकरूपान्तरापरिचये दुर्ग्रहत्वादनुपादेयम् । अनुमितीत्यादि जन
कान्तं न्यायावयवार्थकम् निगमनवारणाय साध्याविषयेत्यादि साध्या
विषयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयताव-
च्छिन्नभावेन पूर्व्वोपदर्शितसाध्याव्याप्यत्वान्यतरासाधारण्यप्रकृतपक्षविशेषणत्वेन
वा तेन पूर्व्वोपदर्शितहेतौ नाव्याप्तिः इदं न दण्डवत् दण्डसंयोगा
भाववत्त्वात् अयं न धूमवान् आलोकवान् आर्द्रेन्धनशून्यत्वादित्यादौ व्यति
रेकिण्युदाहरणस्य हेतुत्वपक्षकसाध्यान्वितस्वार्थबोधकेऽस्मदशासि
उपनयस्य च वारणाय हेतुविभक्तिमदिति तदर्थञ्च प्रकृतसाध्यान्वय
बोधकत्वमात्रोपस्थितिजनकहेतुविभक्तिमत्त्वं हेत्विति सम्पातायातम् ।
यदि च पर्व्वते पर्व्वतभिन्नत्वप्रकारकज्ञानस्य विशेष्यतया अभावस्य
साध्यत्वं हेतुत्वञ्च सिषाधयिषया च न्यायप्रयोगस्तत्र यथा तादृश
ज्ञानाभावादुत्पन्नं ज्ञानमिति दृष्टान्ताभासिनि व्यतिरेक्युदाहरणेऽति
व्याप्तिरित्युच्यते तदावयवान्तरोपस्थितार्थान्वितस्वार्थबोधकविभक्तिम-
त्त्वं वक्तव्यम् उदाहरणान्यत्वेन वा विशेषणीयम् । केचित्तु साध्यविष
यकधीजनकत्वानियतहेतुविभक्तिमत्त्वनियतावयवत्वावच्छेदकरूपवत्त्वं
समुदितलक्षणार्थ इत्याहुस्तच्चिन्त्यम् । हेतुत्वप्रतिपादकेति विभक्त्यर्थ
हेतुत्वविशेष्यकान्वयबोधजनकन्यायावयवत्वमित्यर्थः हेतुत्वं प्रमेय
मित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति तर्कादितरेभ्यो भिद्यते इत्यादि
निगमनवारणाय हेतुमिति विशेष्येति च । घटो दण्डाद्वह्निधूमादि
त्यादिका तु न प्रतिज्ञा तदवच्छिन्नेतरतदाकलनस्य तद्धर्मव्यापकत्वायोगात्

सम्प्रदायविरोधाच्च तेन तत्रत्यनिगमने नातिव्याप्तिरिति भावः । उदा
हरणेति क्वचिज्जिज्ञासानुत्पादेऽपि तद्योग्यतास्वरूपाकाङ्क्षाप्तिः अनुदा-
दाहरणत्वेऽपि तादृशयोग्यतास्वरूपन्यायावयवेति उदाहरणत्वञ्चेह
न न्यायगर्भं वैयर्थ्यात् । साध्याविषयेत्यादि अयं न दण्डादण्डसंयोगा-
दन्यथासिद्धत्वादित्यादौ प्रतिज्ञानिगमनयोर्वारणाय साध्याविषयेत्यादि
व्याख्यातार्थकमुपनयविशेषवारणाय हेतुपञ्चम्यन्तेति । हेत्विति हेतुत्व
बोधकार्थकं हेतुपञ्चम्योर्वैकल्पिकमुपादेयम् उपनयस्य वा नेऽनुसन्धीय-
मानो प्रथमैवान्तः एवं दण्डादित्यादेः स्वपरस्यापि दृष्टान्तस्य पञ्चम्य-
न्तत्वेऽन्वययोगात् कार्याभिधायितेति किया उदाहरणस्य पञ्चम्यन्तत्वस-
म्भवे तु उदाहरणं पूर्ववदत्र प्रार्थवञ्चनस्य हेतुपञ्चम्यन्तत्वं बोध्यम् तेन
निरर्थकत्वसिद्धान्तवह्निमत्पादत्वादौ नाव्याप्तिः पञ्चम्यादेस्तत्तत्साध्या-
देशकादीनां मते तु नानुपपत्तिगन्धोऽपि । केचित्तु हेतुपञ्चम्यन्तत्वं हेतु
त्वप्रतिपादकपदघटितत्वं पूर्ववत्साध्याविषयकज्ञानजनकत्वञ्च इतर
वैरपेक्ष्येण प्रकृतहेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकत्वं साध्यादेश्च न
विवक्षितं वैयर्थ्यादित्याहुः । पञ्चम्यन्तेति अनुमितिपरवाक्यत्वम् अव-
यवत्वं हेतुत्वादौ पञ्चमी लाक्षणिकी दण्डादिभजतइत्यादौ साधकेना
बाधितत्वे अवधिमत्त्वे वा शक्तत्वात् अत्र निष्ठमवधित्वमिव विभागनिष्ठ
मवधिमत्त्वमपि सम्बन्धविशेषः स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत्
तत्सम्बन्धाग्रहे च व्यवहारः शक्तिभ्रमात् वृक्षात्पर्णं पतति इत्यादौ
साधकादिभागे शक्तिस्तत्कालत्व क्रियायाः सम्बन्धमर्यादया भासत
इत्यपि वदन्ति । अतो निगमेऽतिव्याप्तिः पञ्चम्यन्तेति तस्मादित्यत्र च
तत्पदे न लक्षणा शक्त्यैव तादृशज्ञानोपस्थितिसम्भवात् पर्वतो वह्निमान्
वह्निमानयीमान् वा तस्मादित्यादिकन्तु न न्यायप्रयोगः सम्प्रदायविरो
धात् इति वदन्ति । यत्तु हेत्वन्वयानुरोधात् वह्निमानित्यादावपि ज्ञान
लक्षणेति तत्र पञ्चम्या ज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणायैवोपपत्तौ तत्र च लक्ष
णायां मानाभावादत एवोक्तम् आदौ सैव प्रतिज्ञेति अतएव व्याचष्टे

एतेनार्थं गुणः कर्म्मत्वञ्च हेतुत्वं यथासम्भवमुत्पादकत्वं ज्ञापकत्वञ्चेति अतएव लोके किं वह्निमदिति प्रश्ने तदुत्तरं वह्निमदित्युत्तरिते कुतइति जिज्ञासा धूमवत्त्वादित्युत्तरञ्च नहि तत्र ज्ञाने प्रश्नः येन तदाश्रया ज्ञानेनोत्तरयेत् न वा तदीयभाविप्रश्नानुरोधात् अजिज्ञासिताभिधाने नवा कुतइति प्रश्ने ज्ञातमेतदित्यध्याहार्य्यं मानाभावात् दाहो-दहनात् न जलात् जलं सार्थवत् रूपात् न गन्धात्मापि गन्धादित्यादौ तत्र अन्वयानुरोधात् जन्यत्वरूपं हेतुमत्त्वं गन्धः ज्ञानविषयत्वरूपञ्च ज्ञाप्यत्वमर्थः एवञ्च हेतुमत्त्वे शक्तावपि ज्ञाप्यत्वे लक्षणैव नच धूमा-दालोकवान् पर्व्वतो वह्निमान् धूमाद्वह्निमतः सधर्म्मा पर्व्वतो वह्निमानित्यादौ प्रतिज्ञायां पर्व्वतो धूमाद्वह्निमानित्यादौ च तत्रत्यनिगमनेऽव्याप्तिः प्रकृतपञ्चम्यन्तेत्यादि स्वार्थबोधकपदोपस्थापितप्रकृतसाध्यान्वितस्वार्थबोधकपञ्चम्यन्तत्वाद्यात्मकपदघटकावयवत्वस्य विवक्षितत्वात् । यत्तु अयमात्मा ज्ञानादित्यादावव्याप्तिः प्रकृते ज्ञानोपस्थितिसम्भवेन आकाङ्क्षाविरहादिति तन्न यद्विषयकज्ञानस्य हेतुत्वादिकमवगतं तस्य ज्ञापकादिजिज्ञासायामुदाहरणादिप्रयोगः नवेत्तु ज्ञानविषयत्वेनोपस्थितिर्विना तज्ज्ञानम् अन्यथा सुखादेरपि व्याप्त्याद्युपदर्शनप्रसङ्गात् । केचित्तु पञ्चम्यन्तत्वाद्यात्मकपदघटकत्वनियतावयवतावच्छेदकरूपवत्त्वं तादृशपदघटकत्वव्यभिचार्य्यवयवतावच्छेदकशून्यावयवत्वं वा विवक्षितमित्याहुः। तथास्तु आत्मा ज्ञानज्ञाप्यत्वलक्षणयैवोपपत्तौ न प्रातिपदिकेपि लक्षणा आकाङ्क्षावैचित्र्याच्च पदार्थैकदेशेपि ज्ञाने प्रातिपदिकार्थविषयत्वे नाम्नेति कार्य्यं ज्ञातीव कर्त्ता धात्वर्थः यद्धर्म्मविशिष्टस्य हेतुः प्रयुज्यते आकाङ्क्षाबलात् तद्धर्म्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यते अन्यथा यथार्थधूमज्ञानादित्यादिप्रयोगेऽपि धूमादेर्व्याप्यत्वोपदर्शन प्रसङ्ग इति प्राहुः ।

इतरान्वितस्वार्थबोधकत्वे सति स्वीयं यदन्यभिन्नं पदं तदर्थ विशेष्यकान्वयबोधजनकत्वे सति अन्यपदघटकत्वे सति स्वीयानन्वयपदार्थ

विशेष्यकान्वयबोधाजनकान्यत्वे च सति वा न्यायावयवत्वं; प्रतिज्ञात्वं प्रसिद्धा हेत्वोपनयनिगमनयोरर्थौ परस्परमन्वितौ। न तूदाहरणस्य केनापि विभक्त्यन्तं पदं तेन निगमने नातिव्याप्तिः प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वं निगमनवारणाय उपस्थापितान्तम्। प्रमेयत्वमभिधेयं प्रमेयत्वात् इत्यादौ प्रकृत्यर्थप्रकृत्यन्वितस्वार्थबोधकपञ्चम्यर्थान्वितेन प्रतिज्ञार्थः अपि तु तदेकदेशार्थः इति स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वं विशिष्टवैशिष्ट्यबोधजनकस्वार्थोपस्थितिजनकन्यायावयवत्वं विशिष्टबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयवत्वं वा तत्त्वं एकदेशतया हेत्वर्थविशिष्टसाध्यस्य वैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति इतरान्वित स्वार्थबोधकन्यायावयवत्वम् उदाहरणत्वम् अन्वयव्याप्तिबोधकतत्वं व्यतिरेकव्याप्तिबोधकतत्वञ्च विशेषलक्षणद्वयं इतरोपस्थापितार्थविशेषणकस्वार्थबोधकन्यायावयवत्वं स्वार्थविशेष्यकेतरार्थान्वयबोधजनकन्यायावयवत्वं वोपनयत्वम् अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वं हेत्वर्थस्य प्रतिज्ञार्थे न विशेषणत्वेनान्वेति किन्तु तदेकदेशार्थे इत्युक्तप्रायम्।

एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात् तद्विनिर्णयादिरूपतत्कार्य्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते यथेति अनुमितीति यथाश्रुतमिदं हेत्वदोषाणां लक्षणं तदत्वञ्च दुष्टहेतुना तदभिप्रायेणैव उपधेयसङ्करेऽपीत्यादि वक्ष्यति तत्रानुमितिपदम् अनुमितितत्कार्य्यतानिरूपकसम्बन्धित्वेनानुमिति तत्कारणज्ञानपरं साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारानुमितिपरं वा तेनैकत्र हेतौ व्यभिचारादिग्रहेऽप्यन्यस्य परामर्शादनुमित्युत्पादेऽव्यभिचाराद्यात्मकादिज्ञानेनान्यथासिद्धत्वाच्च व्यभिचारादिग्रहाभावस्यानुमितिजनकत्वेऽपि न क्षतिरिति वदन्ति। पर्वतो निर्वह्निर्धूमोऽवह्निरविधेयत्वं वा सेदन्वस्य व्यभिचारीत्यादिभ्रमादनुमितिप्रतिबन्धादाह यथार्थेति ननु प्रसि

न्धकज्ञानविषयव्यभिचारादिघटकसाध्यादेरपि प्रत्येकं हेत्वाभासतापत्तिः । अथ विशिष्टविषयज्ञानं प्रतिबन्धकं तद्घटकञ्च न विशिष्टमिति चेत्तर्हि यथार्थेति व्यर्थं भ्रमविषयविशिष्टस्याप्रसिद्धत्वादित्यनुशयेनाह यद्वेति । केचित्तु दुष्टानामेव हेतूनामेतानि लक्षणानि तत्र तृतीयमि[illegible]थममपि ज्ञायमा[illegible]भिचारादिः प्रति[illegible]त्वमभ्युपेत्य तदर्थञ्च तादृशाभावप्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थज्ञानविषयत्वमध्ये च तत्त्वमित्यस्य तद्वत्त्वमित्यर्थः आद्यस्यैव वा दुष्टहेतुलक्षणत्वमिति प्राहुः । लिङ्गमविवक्षितं यद्विषयत्वेन यादृशविशिष्टविषयत्वेन तेनानुमितिप्रतिबन्धकपक्षविशेष्यकभ्रमविषये साध्याभावादौ सद्धत्वादिनिष्ठे नातिप्रसङ्गः अवच्छेदकत्वेत्वानतिरिक्तवृत्तित्वं तेन विशिष्टस्यासत्त्वेऽपि भ्रमात् प्रतिबन्धेऽपि न क्षतिः विशेषणीयञ्च तादृशविशिष्टान्तराघटितत्वेन तेन प्रमेयत्वादिविशिष्टे सव्यभिचारादौ नातिप्रसङ्गः एवञ्च पक्षतावच्छेदकादिविरहविशिष्टः पक्षः पक्षनिष्ठस्तद्विरहो वा साध्याभाववद्वृत्ति साधनं साधनवद्वृत्ति साध्याभावो वा हेतुदोषः ये केनापि सम्बन्धेन तदाश्च प्रकृतोहेतुर्दुष्टः यादृशधर्म्मिणि यादृशधर्म्मवत्ताज्ञानं अनुमितिप्रतिबन्धकं तस्य धर्म्मिणस्तादृशधर्म्मवत्त्वं हेतुदोष इत्यपि कश्चित् । अथ पर्व्वतत्वेन पक्षत्वे वह्नित्वेन साध्यत्वे विशिष्टधूमत्वेन च हेतुत्वे पर्व्वतादेः आलोकमयत्वविरहाद्ध्रदस्य वह्निधूमशून्यत्वं पर्व्वतस्य महानसीयवह्निधूमविरहितत्वं मेयत्वस्य केवलधूमस्य वा वह्निव्यभिचारो विशिष्टस्य धूमस्य वा पर्व्वतीयवह्निव्यभिचारो न दोषः न वा तत्सम्बन्धेन तत्र तस्य हेतोर्दुष्टत्वम् अतस्तद्धर्म्मावच्छिन्न तत्पक्षकतद्धर्म्मावच्छिन्नतत्साध्यकतद्धर्म्मावच्छिन्न तद्धेतुकानुमिति प्रतिबन्धकत्वं वाच्यं तथाच निर्व्वह्निः पर्व्वतो वह्निमान् पर्व्वतावृत्तिवह्निमान् वा तद्व्यभिचारिणः पर्व्वतावृत्तेर्वा धर्म्मादिश्चादौ न कोपि हेत्वाभासः स्यात् तादृशानुमितेरप्रसिद्धत्वादिति । अत्र वदन्ति यद्विषयनिश्चयस्य विरोधिविषयताप्रयुक्तत्वदु-

तरम्, अनुमितौ अनाहार्य्यमानसज्ञाने वा पक्षतावच्छेदकविशिष्ट
पक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छे-
दकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्ट हेतुम-
त्त्वावगाहित्वस्य च तयोर्व्यतिरेकस्तत्त्वं हेतुदोषत्वं पक्षतावच्छेदक
वैशिष्ट्यादिकञ्च वैज्ञानिकं नतु वास्तवं ग्राह्यं व्याप्तिश्चान्वयित्वं व्यति-
रेकित्वं वा। तादृशावगाहित्वप्रसिद्धिराहार्य्यज्ञानएवाभ्युपेतव्यानन्य-
गतिकत्वात् एवञ्च वस्तुमात्रनिश्चयादनन्तरं निर्वह्नित्वाविशिष्टे वह्ने-
रग्रहेपि न व्याप्तिस्तस्य विरोधि[illegible]त्वात् एवं साध्यनिश्चयोत्तरं
तस्यानुमितावपि मानसज्ञानाविरोधित्वाच्च तादृशि पक्षे तादृश
साध्यवैशिष्ट्यस्य तादृशसाध्यनिरूपितव्याप्तिविशिष्टतादृशहेतुवैशिष्ट्य-
स्य चावगाहिनो ज्ञानस्य यद्विषयं ज्ञानं विरोधिविषयकं तत्त्वं
तादृशज्ञानविरोधित्वं वा हेतुदोषत्वं ज्ञानविरोधित्वञ्च तद्विषयविष-
यकयद्विरोधियद्विषयत्वम् एवमित्थमेव रीतिरितरत्र सर्व्वत्र स-
व्यभिचारलक्षणादावनुसर्त्तव्या इत्यपि केचित्। केचित्तु यादृशपक्षक
यादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्व
मेकमात्रदोषत्वसत्त्वे च तत्त्वमेव हेत्वाभासत्वं स चातिरिक्त एवान्योन्या
भावइति न वैयर्थ्यं पञ्चविधभेदोक्तिस्तु तत्सम्भवस्थलाभिप्रायेण
व्यभिचारादेः साध्यादिभेदनियन्त्रितत्वात् शब्दाभेदमात्रस्य चाकिञ्चि-
त्करत्वादिति प्राहुः। स्यादेतत् शब्दोऽनित्यः शब्दत्वात् इत्यत्रासाधा
रणोऽव्याप्तिः सर्व्वसाध्यवद्व्यावृत्तेस्तत्रासत्त्वात् एवं शब्दोऽनित्यः ज्ञात
कत्वात् इत्यस्य सत्प्रतिपक्षे नित्यत्वव्याप्यमव्ययत्वादावपि पक्षस्य
तद्वत्त्वाविरहादित्याशङ्कां तयोरसाध्यत्वेन निराकुरुते दशाविशेषइति।
हेत्वोः सद्धेत्वोः असाधारणः पक्षमात्रवृत्तिः सन् प्रतिपक्षो विरोधि
परामर्शो यस्य स तथा तयोर्दशाविशेषे हेतौ सर्व्वसाध्यवद्व्यावृत्त-
त्वस्य पक्षे साध्याभावव्याप्यवत्त्वस्य च असदशायामाभासत्वात् अनु-

नित्यजनकत्वात्सद्धेत्वादौ साध्यवद्व्यावृत्तत्वादिबुद्धेः प्रतिबन्धकत्वं परामर्शादिति न तु तद्विषयस्य दोषत्वम् असत्त्वात् अन्यथा बाधभ्रमेणानु-मित्यनुदयात् तस्यापि दोषत्वं स्यात् किञ्च साध्याभाववद्व्याप्यवत्ता भ्रमयोरनुमितिविरोधित्वे विशेषः निर्युक्तिकस्तु प्रवादो न श्रद्धेयः यत्तु ज्ञानस्य यदनुमितिप्रतिबन्धकतावच्छेदकं तद्रूपं तत्प्रकारक प्रमाविषयत्वञ्च लक्षणार्थः तच्च द्विविधं विषयरूपं साधारण्यादिबाधे च प्रमितसाध्याभाववान् पक्षः तद्विषयत्वेन ज्ञानस्यानुमितिप्रति बन्धकत्वात् अविषयरूपञ्च विरोधिसामग्रीकालीनत्वादिकं तद्रूपवज् ज्ञानस्यैव तद्विषयस्य हेतोरपीति तन्न तद्रूपं हि हेतोर्नाभेदेन बाधे तदभावात् अतएव नाश्रयतया वह्निव्याप्तिमान्स्थलादिमानिति धूमेऽति प्रसङ्गाच्च साध्याभाववत्पक्षस्यैव साध्याभाववद्वृत्तिहेतोर्ज्ञानस्य प्रति बन्धकत्वात् साधारण्यादिविषयकत्वस्य ज्ञाननिष्ठस्यैव प्रतिबन्धक तावच्छेदकत्वात् सत्त्वादिसाध्यके ज्ञानेऽतिप्रसङ्गाच्च यथाकथञ्चित्तद-रूपस्य चातिप्रसञ्जकत्वात् विरोधिसामग्रीसमवहितोऽपि च लिङ्ग परामर्शे न स्वसाध्यकानुमितेः प्रतिबन्धको मणिसमवहितो वह्निरिव दाहस्य अथ यद्धर्मविशिष्टज्ञाने सत्यवश्यमनुमितिप्रतिबन्धः तदेवात्र प्रतिबन्धकतावच्छेदकमुक्तं भवति च प्रतिबन्धकीभूतविरोधिसामग्री कालीनत्वादिविशिष्टे परामर्शे तथा इति चेत् न वैकल्यादिसाधारण कारणघटिता सामग्रीकापि प्रतिबन्धिका विशेषणत्वेन तत्सत्त्वे कार्य्या त्पादस्य दुर्वारत्वात् किन्तु विरोधिपरामर्शस्तथा यदि च तत्सत्त्वेऽपि तत्साध्ये बाधावतारात्नानुमितिप्रतिबन्धः प्रामाणिकस्तदा अप्रामाण्य ग्रहाभावस्येव तदभावस्यापि वैशिष्ट्यमत्र निवेश्यतां यथा च न स प्रमासाधारणविरोधिपरामर्शवत्त्वे नानुमितिस्तथा तथाविधबाधादि ग्रहेऽपीत्यतिप्रसङ्गः । नन्वतीतादौ लिङ्गे विरोधिपरामर्शकालीनत्व मपि यद्यपि यद्विषयत्वेन ज्ञानस्य अनुमितिप्रतिबन्धकत्वं तद्रूपमेव बाधे सत्प्रतिपक्षे च विरोधिव्याप्त्यादिकमेव तथा तद्रूपमपि हेतो